सत्यनाथमाहात्म्य रत्नाकरः
(संस्कृत मूलमात्रम्)

॥श्रीः॥

श्रीसत्यनाथमाहात्म्यरत्नाकरः

॥ प्रथमः सर्गः॥

श्रीरामे सुगुणग्रामे रमारामे मनोरमे ॥
सत्कामे रमतां ह्रन्मेऽवाप्तकामेऽसमोत्तमे ॥१॥

सत्यनाथं सतां नाथं चित्रचारित्रवारिधिम् ॥
वन्द्यं वन्दारुमन्दारं वन्दे गोविन्दमन्दिरम् ॥२॥

सत्यनाथेन्द्रपादाब्जदासापूर्वशिरोमणिम् ॥
सत्याभिनवतीर्थश्रीपादमिष्टप्रदं भजे ॥३॥

गुरुभक्तिमता तेन गुरुमाहात्म्यमीरितम् ॥
उरु यत्तन्मनाग्वक्ष्ये गुरुप्रीत्यै तदाज्ञया ॥४॥

सत्यनाथेन्द्रदत्तश्रीमहासाम्राज्यवैभवः ॥
सत्याभिनवतीथेन्द्रः सज्जनान् समपीपलत् ॥५॥

महद्भिर्महितो मह्यामर्हाश्चार्वीश्चरन् क्रियाः ॥
महतः क्षेत्रतीर्थानि हंसराट् चरति स्म सः ॥६॥

रज्यन् रामनमस्यायां मज्जंस्तीर्थेषु सर्वशः ॥
सज्जनेभ्यो वसुप्रादात् सज्यः सर्वक्रियासु सः ॥७॥

कन्यागतं कविं बुध्वा सोऽगात् क्रोधनहायने ॥
मरूरुनामकग्रामं कृष्णातीरविराजितम् ॥८॥

वासार्हे वसति स्मास्मिन् मासान् स कतिचिन्मठे ॥
वासवागारसदृशे व्यासरामार्चने रतः ॥९॥

असमैः कुसुमैरत्र विचित्रैश्चित्रमार्चयत् ॥
असमं ससमं रामसोममन्यैश्च साधनैः ॥१०॥

विहितस्वक्रियोऽजस्त्रमहिराज इवाद्भुतम् ॥
महितं मध्वशास्त्रसन्महितो व्याकरोदसौ ॥११॥

मरूरुग्राममभितः पूर्षु ये प्रभुपुङ्गवाः ॥
कावेरीपाण्डुरंगाख्यप्रमुखा विश्रुता गुणैः ॥१२॥

लक्ष्मीकान्ताख्यमुख्याश्च तथा जानपदास्तथा ॥
अभ्येत्य भूतिमन्तस्तं जगद्गुरुमपूजयन् ॥१३॥

प्राक् श्रुतेभ्यो गुणेभ्यस्तं गुणैः शतगुणैर्युतम् ॥
आलोक्य कृतकृत्यास्ते मानिताः करुणावता ॥१४॥

एतादृशं गुरुं द्रष्टुं समायात जना इति ॥
आह्वातुमिव तान् व्याप्नोद्यशोदशदिशस्तदा ॥१५॥

Rarest Archiver

तदाहूता इवाशेषा मुदाऽशाभ्यस्तमागमन् ।।
सरस्वन्तं सरस्वत्य इव सत्याभिनूतनम् ।।१६।।

निवृत्तिसङ्गमक्षेत्राद्रघुनाथार्यपूर्वकाः ।।
शेषाचार्यमुखाश्चायन् छात्रवर्गान्विता मुदा ।।१७।।

कौलिग्युपपदोपेततिम्मणाचार्यपूर्वकाः ।।
कोलूरुनामकग्रामादागमन् शिष्यसंयुताः ।।१८।।

छलारिनरसिंहाख्याचार्या ये विश्रुता गुणैः ।।
तत्सूनुश्रीनिवासाख्याचार्यपूर्वास्तथागमन् ।।१९।।

सोत्र इत्युपनामेत कोनेर्याचार्यपूर्वकाः ।।
बुधाः शिष्यप्रशिष्यैश्च तमायुर्विश्रुता भुवि ।।२०।।

का(ड्लू)लूरुपपदोपेतनृसिंहाचार्यपूर्वकाः ।।
का(ड्लू)लूरुनामकग्रामात् प्रौढशिष्यैस्तमागमन् ।।२१।।

विद्यापत्याभिधाचार्यपूर्वाः स्वजनसंयुताः ।।
सङ्गलिग्याह्वयपुरादागच्छन् भक्तिपूरिताः ।।२२।।

करहाटविराटोरुकरवीरादिगास्तथा ।।
अवधान्युपनामेतनारायणपदादयः ।।२३।।

जम्बिगीश्रीनिवासाद्या आचार्याश्च समागमन् ।।
विजयाभिधपुर्यादिनिवासा आदरान्विताः ।।२४।।

पाण्डुरङ्गोपनामेतकेशवाचार्यकायजौ ।।
आनन्दनरसिंहाख्यावाचार्यावागतौ तथा ।।२५।।

उम्रज्युपपदोपेतकृष्णाचार्यपुरोगमाः ।।
मणिपुर्यादिनिलया आगमंश्च मुदा तदा ।।२६।।

तथा वरदराजाख्याचार्यनन्दन आगमत् ।।
शेषाचार्योऽपि तद्वंश्यः रामाचार्यादयो मुदा ।।२७।।

तथा कोप्रोपनामेतनृसिंहाचार्यपूर्वकाः ।।
द्रक्ष्यामस्तं कदेत्येवं वदन्तोऽभ्यागमन्मुदा ।।२८।।

सगराख्यपुरात्पद्मनाभाचार्यादयो बुधाः ।।
सत्याभिनवतीर्थेन्द्रं सन्दर्शनहृदागमन् ।।२९।।

सङ्गर्सोपपदोपेतनृसिंहाचार्यपूर्वकाः ।।
यातगिर्याख्यपुरतस्तमायन् महतो महात् ।।३०।।

बदरीनरसिंहाख्याचार्याद्याश्च तदा मुदा ।।
कौतालमानवी नाम पुरागाराः समागमन् ।।३१।।

प्रल्हादाद्या मुरार्याद्या आचार्या आगतास्तथा ।।

Rarest Archiver

राचूरुनामकपुरान्मरुरूं परया मुदा ॥३२॥

तदा वरदराजार्यवंशस्था आगतास्तथा ॥
आदवान्याह्वयपुराद्रङ्गाचार्यादयो बुधाः ॥३३॥

कन्दनोलुपुरादागुः केशवाचार्यपूर्वकाः ॥
विठ्ठलाचार्यपूर्वाश्च तत्सन्दर्शनलालसाः ॥३४॥

गार्लपाडुपदग्रामाद्भूमाचार्यादयो बुद्धाः॥
सत्याभिनवतीर्थेन्द्रं सत्रा छात्रैः समागमन् ॥३५॥

मानमोडीत्युपपदवेदव्यासाख्यपूर्वकाः ॥
कोविदाश्चादराददाशु श्रावकैरमुमागताः ॥३६॥

मामाडालुपदग्रामान्नारायणपदादिकाः ॥
आचार्याः श्रावकोपेता आयाता महतो महात् ॥३७॥

ताडिपत्रपदग्रामात्तिम्मणाचार्यपूर्वकाः ॥
तमायन् छात्रवर्गेतास्तत्सन्दर्शनलालसाः ॥३८॥

रामाचार्यस्तथामुख्यप्राणाचार्यस्तथा परे ॥
महिषीबलगारादिग्रामावासाः समागताः ॥३९॥

रघुवर्यपदोपेतश्रीपादाश्च समागमन् ॥
रूप्यपीठपुरात् कृष्णपूजकाः परमादरात् ॥४०॥

रघुनाथाभिधाचार्यप्रमुखाश्चागतास्तथा ॥
प्रौढशिष्यप्रशिष्याढ्याः काञ्चीक्षेत्रनिवासिनः ॥४१॥

वराहार्यश्च दूर्वासश्रीनिवासार्यनन्दनः ॥
आगुः कर्नाटकाच्छेषजयतीर्थार्यपूर्वकाः ॥४२॥

(तथा व्यासोपनामेतश्रीविष्ण्वाचार्यपूर्वकाः ।
काशीक्षेत्रात् समाजग्मुस्तत्सन्दर्शनलालसाः ॥४३॥)

नानाशास्थाग्रहारादिसंस्थिताः प्रथिताश्च ये। ।
पाण्डित्यादिगुणैस्तेपि मुदायातास्तदा खलु ॥४३॥

तमागता धरादेवा देवाः पार्थकृतं क्रतुम् ॥
विरिञ्चाद्या इवा सङ्ख्या रेजुः सर्वदृगुत्सवाः ॥४४॥

सत्याभिनवतीर्थेन्द्रमभ्येत्यादरतोऽनमन् ॥
खर्जूरीनारिकेळादिफलौघार्पणपूर्वकम् ॥४५॥

ततः सभाजितास्तेन तत्रोषुर्वासरान् बुधाः ॥
कतिचिद्भुवनाश्चर्यतच्चर्यासन्दिदृक्षया ॥४६॥

सत्याभिनवतीर्थेन्द्रं विद्वदालिसमागमम् ॥
सम्पश्यतामशेषाणामभूतोऽभून्महोत्सवः ॥४७॥

अदृष्टामश्रुतां पूर्वं नानाकुसुमसत्फलैः ॥

Rarest Archiver

श्रीरामवेदव्यासार्चा चरन्तं तत्र सन्ततम् ॥४८॥

क्रियाः समस्तशः साध्वी परमादरतः कृताः ॥
प्रतिक्षणं स्वगुरवे प्रार्पयन्तं पृथक् पृथक् ॥४९॥

पञ्चाननमहानादं प्रौढपण्डितमण्डले ॥
मध्वशास्त्रप्रवचनं कुर्वन्तं कुण्डलीन्द्रवत् ॥५०॥

दर्शनस्पर्शनालापैः पुनन्तमखिलान् जानान् ॥
चिन्तामणिमिवाशेषं वितरन्तं मनोरथम् ॥५१॥

सदा स्वगुरुमाहात्म्यं वर्णयन्तं महादरात् ॥
तदीये पादुके रम्ये श्रीकरे प्रातरन्वहम् ॥५२॥

भद्रासनातपत्राद्यै राजराजोपचारकैः ॥
प्राचर्यन्तं स्वभाग्यस्वं प्रार्पयन्तमनेकधा ॥५३॥

सत्कआह्लादने मित्रं वीतिहोत्रं सुवर्चसि ॥
त्रिनेत्रमिव वैराग्ये शान्तौ नक्षत्रनायकम् ॥५४॥

मित्रपुत्रं वितरणे गाम्भीर्ये तटिनीधवम् ॥
प्रद्युम्नमिव लावण्ये देवेन्द्रमिव सम्पदि ॥५५॥

दुर्वादिसर्पदर्पापहरणे पन्नगाशनम् ॥
राजराजादिसंवन्द्यं सुन्दरं श्रीपदाम्बुजम् ॥५६॥

कदाप्यकोपतापं सुप्रसन्नवदनाम्बुजम् ॥
सत्याभिनवतीर्थेन्द्रं सत्यनाथकराब्जजम् ॥५७॥

आलोक्यात्रागता रेजुर्भूवैकुण्ठे मठे तदा ॥
ते मुक्ता इव वैकुण्ठे परमानन्दनिर्भराः ॥५८॥

सुहसितवदनेन्दुः सत्यनाथेन्द्रहस्त-
स्वमलकमलजातः श्रीपदोऽसौ तदा तान् ॥
द्विजपतिरिव गोभिर्नन्दयामास रम्यै-
र्निजगुरुमहिमेतैस्तापहृद्भिर्वचोभिः ॥५९॥

श्रीसत्याभिनवेन्द्रचारुचरितं वाङ्मानसागोचरं
दृष्ट्वा श्लाघ्यतमं जनैरखिलशः स्वाभीष्टचिन्तामणिम् ॥
को देशः क्व समागता वयमहो के वेत्यनिर्धारणाः
स्वानन्दाब्धिविहारिणोऽग्रिमकृतिं नाज्ञासिषुस्ते बुधाः ॥६०॥

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ॥
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽभूत्प्रथमो मनोरथकरे लाल्ये गुणज्ञैर्जनैः ॥६१॥

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे प्रथमः सर्गः

Rarest Archiver

।। द्वितीयः सर्गः।।

प्रातः कदाचिद्गुरुपादुकार्चां विधाय सिंहासनसन्निषण्णम् ।
प्रणम्य सत्याभिनवं समन्तादुपाविशन् श्रीचरणं बुधग्र्याः ।।१।।

तदा स्वगुर्वादरवारिराशिर्मुदा प्रवक्तुं स्वगुरुप्रभावम् ।
सत्पद्मनाभात्मजकेशवाख्याचार्यादिकान् प्रारभतार्यवर्यान् ।।२।।

नाथा मदीयाः शुभसत्यनिध्याह्वयेषु तीर्थेषु गतेषु लोकम् ।
परं समाराधनमाचरंस्तद्धृदब्जगश्रीपतिरामतुष्ट्यै ।।३।।

सम्प्राप्तसाम्राज्यपदा महान्तो नाथा रमानाथमथार्चयन्तः ।
स्वान्तस्थतीर्थाः सततं प्रमोदतीर्थार्यसत्तीर्थरताः समासन् ।।४।।

ते लब्दवर्णप्रवराः प्लवाब्दे श्रीमध्वराद्धान्तनिबद्धदीक्षाः ।
दुर्लब्धवर्णाभिभवाय नाथाः महोद्धवेता अगमन्नपाचीम् ।।५।।

श्रीवेङ्कटाधीशमधीश्वरा नो लब्ध्वाध्वनि श्रीविधिपूर्वपूज्यम् ।
श्रद्धावदग्र्याः समपूजयंस्तं शुद्धाशया माधवमोदकामाः ।।६।।

समेत्यकाञ्चीमथ नायका नः काञ्चीशमानञ्चुरलं महान्तः ।
विरिञ्चवैरिञ्चशचीशपूर्वसुराञ्चितं श्रीवरदाधिराजम् ।।७।।

नाथांस्तदाह्वाययति स्म चञ्जीपुराधिपोऽनन्तपदोऽतिमोदात् ।
आकर्ण्य काञ्चीपुरमागतांस्तत्प्रसादसम्पादनमानसोऽलम् ।।८।।

गजप्रवेकादिकया स चम्वा निजानुजैराश्रितवाजिराजैः ।।
द्विजाधिराजान् दययागतांस्तान् द्विजाग्रगण्यैः प्रभुराडथाभ्यैत् ।।९।।

ते राजराजप्रतिमा अनन्तराजेन बद्धाञ्जलिनानुयाताः ।।
तां रम्यचञ्जीपदराजधानीं मुदाविशन् वैभवतोऽथ नाथाः ।।१०।।

नाथा अथो नः प्रथिताः पृथिव्यां सम्प्रार्थितस्तेन पुमर्थहेतोः ।।
नराधिनाथेन पुरे तदीये भृशानुकम्पार्द्रहृदो वसन् स्म ।।११।।

अनन्तराजेन सुपूज्यमानास्तद्राजधान्यां व्यजयन्त नाथाः ।।
दुर्वादिमत्तद्विपपञ्चवक्त्राः विहारिणः शास्त्रमहीधरेषु ।।१२।।

योऽय्येतिशब्दादिमदीक्षिताख्योऽजय्यो परैः पाणिनिसूत्रभाष्ये ।।
नैय्यायिकाद्यागममर्मवेदी माय्यग्रगण्यो मधुरापुरेऽभूत् ।।१३।।

अखर्वगर्वः स नृपस्य मन्त्री शुश्राव नाथान् प्रथितान् पृथिव्याम् ।।
समस्तविद्यानिपुणान् फणीन्द्रसमान् महाभाष्यविचारणायाम् ।।१४।।

दुर्वादिदन्तीन्द्रमदातिरेकनिवारणे प्रौढमृगेन्द्रलीलान् ।।
अनन्तराजेन निजे पुरेऽलं सम्भाजितान् सम्प्रति संयमीन्द्रान् ।।१५।।

दुष्टः शठाग्र्यो विदधे कुबुद्धिं भ्रष्टाग्रगण्यो खिल वैष्णवेशान् ।।
समस्तविद्यानिपुणान् प्रभून्नो विमानितान् कर्त्तुमतीव सोऽथ ।।१६।।

Rarest Archiver

अस्मत्प्रभुश्रीचरणाब्जपार्श्वं सम्प्रेषयामास विलेख्य पत्रम् ॥
स्वाभीष्टसिध्यै कपटेन दुष्टः शिष्टाग्र्यवत्तन्महिमानभिज्ञः ॥१७॥

नाथा भवच्छ्रीचरणाम्बुजाभ्यां मया कृताः सन्नतयो भवन्तु ॥
आकर्ण्य माहात्म्यमहं भवच्छ्रीपादाब्जसन्दर्शनमानसोऽस्मि ॥१८॥

आयान्त्वहो श्रीचरणा भवन्तः कारुण्यपूर्णाः कृपया मयीह ॥
अहं भवद्दर्शनभाषणाद्यैः पूतो गमिष्यामि कृतार्थभावम् ॥१९॥

मया कृता पाणिनिसूत्रभाष्यटीका भवद्दृष्टिपथं समेतु ॥
साक्षाद्भवन्तः फणिराजदेवा इतीह कीर्त्तिः प्रसृता हरित्सु ॥२०॥

इति प्रमेयप्रतिपत्तिहेतुं तत्प्रेषितं पत्रमथास्मदीशाः ॥
तद्वीक्ष्य तच्छास्त्रिपराजयार्थं गन्तव्यमेवेति मनोव्यधुस्ते ॥२१॥

अनन्तराजप्रमुखास्तदोचुर्नाथा न गन्तव्यमभिज्ञवर्यैः ॥
मायाविना प्रैष्यत पत्रमेतद्दम्भेन नैवात्र विचारणास्ति ॥२२॥

अशेषदुर्वादिमतं गजाग्र्यपञ्चाननैस्तस्य जये भवद्भिः ॥
न संशयोऽथापि न कश्चनार्थस्तस्मान्न गन्तव्यमिति स्म भाति ॥२३॥

अय्येतिशब्दादिमदीक्षिताख्यो भवत्सु नूनं जयवत्स्वपीशाः ॥
अस्तीर्ष्ययान्याभ्युदयासहोऽलं दुष्टोऽपमानं भवतां चिकीर्षुः ॥२४॥

इत्यस्मदीयैर्मधुराख्यपुर्यामानीतपत्रैर्वयमत्र नाथाः ॥
अश्रौष्म सर्वज्ञवरा भवन्तो नार्हन्ति गन्तुं न विचारणेति ॥२५॥

नाथा इति प्रोचुरथो मदीययशोविधुर्नैव कलङ्कवान् स्यात् ॥
प्रत्यर्थिना मध्वमताग्रगण्या आकारिताः सञ्चकिता बतेति ॥२६॥

न शोभते शूरनृणां रणे हि प्रत्यर्थिवैमुख्यमतो विसृज्य ॥
सहस्रकृत्यान्यपि तत्समीपं गन्तव्यमेवात्र न संशयोऽस्ति ॥२७॥

गुरुप्रसादाद्विजयः सदा नो यो दुर्जनो वाञ्छति नोऽपमानम् ॥
कर्तुं स एवैष्यति गाढमेनं ब्रूमो वयं सत्यमितोऽन्यथा न ॥२८॥

सर्वेऽपि नः स्वामिभिरित्थमुक्ताः तूष्णीं समासन् विगतोत्तरास्ते ॥
अभिज्ञवर्याः प्रभवो भवन्तो बाला वयं सत्यमिति ब्रुवन्तः ॥२९॥

अय्येतिशब्दादिमदीक्षिताख्यो मन्त्री समासीत् पुरि यत्र दुष्टः ॥
समस्तविद्यानिपुणा महान्तः प्रतस्थिरे तां पुरमस्मदीशाः ॥३०॥

राजापराधात् किल राजदूताः शस्त्रेण तन्मन्त्रिवरस्य नेत्रे ॥
व्यनाशयन् राजनिदेशतस्तमनेकधा दुष्टमपीडयंश्च ॥३१॥

स साम्प्रतं पापतमो बतास्ते जीवन्मृतप्राय इति प्रवृत्तिम् ॥
श्रुत्वोदितां केनचिदध्वनीशैस्तदैव कौतूहलमापि गाढम् ॥३२॥

Rarest Archiver

ततः परावृत्य यदागमंस्ते चञ्जीपुरं तत्र विलोक्य लोकाः ।।
शशंसुरेनान् महतोऽतिवेलाकुतूहलाम्भोधिविहारिचित्ताः ।।३३।।

यत्सत्यनाथेन्द्रमहापमानसमीहयैवापदमाप चित्राम् ।।
शास्त्री स तेषां महतामृषीणां भूमौ पुमांसः सदृशा न हीति ।।३४।।

आद्यर्षिराजां भगवत्पदानां माहात्म्यरत्नानि महाद्भुतानि ।।
अस्मत्प्रभूणां गणयेत् कविः को रत्नाकरस्येव मणीनसङ्ख्यान् ।।३५।।

इत्थं सद्गुरुसत्यनाथभगवत्पादप्रभावामृतं
श्रीसत्याभिनवेन्द्रचारुवदनाम्भोजोद्गतं भूसुराः ।।
पूर्वोक्ता गुरुभक्तिभारविनताः पीत्वा श्रवःसम्पुटैः
तृप्तास्तद्गुरुभक्तिमद्भुततमा दृष्ट्वा शिरोऽकम्पयन् ।।३६।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तद्गुणसारलुब्धकविभिः सर्गो द्वितीयोऽभवत् ।।३७।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे द्वितीयः सर्गः

Rarest Archiver

।। तृतीयः सर्गः।।

श्रीसत्यनाथार्यमहानुभावमाहात्म्यचित्रामृतपानतृप्तः ।।
सुधां प्रसिद्धां न हि काङ्क्षति स्म सुरार्थनीयामपि योऽद्भुतं तत् ।।१।।

कर्मन्दिराजः स गुरुप्रभावं शर्मातिरेकात् गदितुं कदाचित् ।।
धर्मोच्छ्रयं प्रारभतार्यवृन्दं सत्याभिशब्दादिनवाभिधानः ।।२।।

अशेषशास्त्राप्रतिमा जगत्यामशेषशास्त्रिप्रवरान् जयन्तः ।।
अशेष दिक्स्थैः परिपूज्यमाना नाथा अगुः सङ्गलिगीं मदीयाः ।।३।।

ते कृष्णवेण्यामवगाह्य सौख्यतीर्थार्चितार्चाकुलमर्चयन्तः ।।
तदागमाख्यानरताः समूषुश्चिरं जनाक्षिक्षणदा हि तत्र ।।४।।

निरम्बुके सङ्गलिगीमरीचिपुरान्तरे प्राण्युपकारहेतोः ।।
अनन्यसाध्यां ननु दीर्घिकाग्र्यामकारयन् स्वादुजलोज्वलां ते ।।५।।

अत्रावगाहं रविवासराणां यः सप्तके भक्तित एव कुर्यात् ।।
ऋणाद्विमुक्तः सभवेद्गुरूणां प्रसादतो नात्र विचारणास्ति ।।६।।

इत्थं विनिश्चित्य मुनीश्वरास्ते त्रिकालविज्ञा ऋणमोचनाख्याम् ।।
तीर्थान्तिमां संव्यधुरस्मदीशाः सोपानभाजो वरवापिकायाः ।।७।।

ये प्राणिनो मर्त्यपशुद्विजाद्याः महापिपासाश्रमकर्शिताङ्गाः ।।
मध्याह्नकाले यमवाप्य देशं पुरा मृतेः सङ्कटमन्वभूवन् ।।८।।

तत्तेऽखिलाः सम्प्रति तत्प्रदेशसमुल्लसत्तीर्थमवाप्य पीत्वा ।।
मङ्त्वा निकामं भृशमोदमाना गायन्ति नाथानतिचित्रचर्यान् ।।९।।

सोपानभूषं जनतोरुतोषं लोकर्णमुक्तिप्रगुणानुषक्ति ।।
तत्सात्यनाथं जलजन्तुयूथं भात्यद्यतीर्थं कृतसत्पुमर्थम् ।।१०।।

मरीचिपुर्यामभवत् प्रसिद्धानन्दादिमाचार्यपदो द्विजो यः ।।
अभ्येत्य मत्स्वामिपदाम्बुजाङ्कं प्रणम्य वाचं समवोचदेषः ।।११।।

भो स्वामिनोऽग्रे भवतां ब्रवीमि किं मामकं दुःखमहं भवाब्धौ ।।
ऋणोरुपाषाणनिबद्धकण्ठो मग्नो न पश्यामि च तारकं मे ।।१२।।

इति ब्रुवाणं प्रभवोऽब्रुवंस्तं दयावशा भास्करवासराणाम् ।।
त्वं सप्तके मज्ज सुचेतसर्णविमोचने स्या ऋणतो विमुक्तः ।।१३।।

इतीरितः स्वामिभिरेष विप्रस्तदुक्तिविश्वासयुतस्तथैव ।।
निमज्जति स्मामलचेतसर्णविमोचनाख्ये वरवारितीर्थे ।।१४।।

तदात्व एवानुज एव चित्रं प्रादाद्धि दीनारशतात्मवित्तम् ।।
ऋणं निराकुर्विति भाषमाणः तस्मादथानन्दपदोऽभ्यनन्दत् ।।१५।।

आनन्दनामाथ स भूमिदेवः श्रीस्वामिवाचोमहिमानमज्ञः ।।
संस्मृत्य संस्मृत्य कुतूहलेतो वित्तेन तेनर्णमपाचकार ।।१६।।

Rarest Archiver

स्तुत्यान् ततोऽस्तौदिति नायकान्नो भवादृशा नैव महीतलेऽस्मिन् ।।
नाथा भवन्तः परमर्षिराजाः सत्यं पुनः सत्यमथोऽन्यथा न ।।१७।।

नमो भवद्भ्योऽस्तु महत्तमेभ्यो नाथा भवद्वाक्श्रुतिरेव सत्यम् ।।
भवत्कृतायाः वरवापिकायाः भृशोपपन्नर्णविमोचनाख्या ।।१८।।

एवं जना अत्र परेऽपि तीर्थे स्नात्वा च पीत्वार्णविमुक्तिमायन् ।।
अहो बुधा नः पतयश्चरित्ररत्नाकरास्तत्सदृशा न केऽपि ।।१९।।

यः स्वामिराजोरुकथाः प्रवक्ति श्रृणोति वा पूर्णमनोरथः स्यात् ।।
इति ब्रुवन् भूय उवाच सात्यनाथीं कथां तत्करकञ्जजः सः ।।२०।।

स्वतीर्थवृन्दावनदर्शनोत्कहृदो निवृत्यादिमसङ्गमाख्यम् ।।
क्षेत्रं न्यषेवन्त गताः कदाचित् तत्स्वामिनो भक्त्यतिरेकभूषाः ।।२१।।

संसेव्य तत्सत्यनिधीन्द्रतीर्थवृन्दावनं दक्षिणदिग्जनांस्ते ।।
पूतां विधातुं हरितं ततस्तान् प्रतस्थिरे वादिकरीन्द्रसिंहाः ।।२२।।

क्षेत्रेषु तीर्थेषु च देवदेवं संसेवमानाः सकलान् पुनन्तः ।।
अर्या यदागुर्नगमुच्चचर्यास्ततोऽरुणाख्यं स्मरणाघमुक्तिम् ।।२३।।

तदैव ×××कुमस्करींद्रः श्रीराघवव्यासहरेर्गुरूणाम् ।।
मध्वादिकानां चरतीत्यश्रृण्वन् विद्रोहमेते रघुपादिदासाः ।।२४।।

ततोऽशपंस्तं कुपिता महान्तो नानाविधस्त्रीरतिपूर्वदोषैः ।।
महापकीर्तिः परमापमानस्त्यक्तः स्वलोकैर्भवितेति नाथाः ।।२५।।

त्वं सद्गुणैः सद्यशसाभिवृद्धो भाग्येन तारेश इवाखिलेन ।।
अनुग्रहान्नः प्रतिवासरं स्या इति स्म ते मे वरमप्ययछन् ।।२६।।

अमोघशापेन तदीयकेनाविलम्बतोऽयादपमानमुच्चैः ।।
काञ्च्यां तथा दुर्यशसा ततोऽस्ति त्यक्तोद्य ×××पदो निजैः सः ।।२७।।

स्वामिप्रदत्तेन वरेण चाहं प्रतिक्षणं प्रत्यहमृद्धभाग्यः ।।
मृषा मृषा वा कवयो वदन्तु किं शंसनीयोऽस्मदिनप्रभावः ।।२८।।

वाराणसीं गन्तुमनाः कदाचित् क्षेत्रं निवृत्यादिमसङ्गमाख्यम् ।।
श्रीकृष्णवेणीतटगं मुदादावगां परं सत्यनिधीन्द्रवासम् ।।२९।।

वृन्दावनान्तर्गतरामदेवनिदेशतोऽथो वरकृष्णवेणीं ।।
तीर्त्वा पुरोगां ननु मार्गशीर्षे संवत्सरे दुन्दुभिनामकेऽहम् ।।३०।।

समिज्यमानं सकलैर्जनैर्मामनारतं वीक्ष्य जनोक्तितश्च ।।
मत्वा महावित्तयुतं तदानीं कालप्रतीक्षां व्यचरन् स्म चोराः ।।३१।।

भक्त्या समाह्वाययति स्म कश्चित् गुद्दण्टिराष्ट्राधिपतिस्तदा माम् ।।
सप्रार्थनं विप्रमुखेन पत्रं सम्प्रेष्य कोण्डय्यपदाभिधेयः ।।३२।।

कोण्डय्यनामाधिपतिं प्रयान्तं ग्रामं ततो मां समवेत्य चोराः ।।

Rarest Archiver

महीध्रमध्ये तरुवर्गदुर्गे वेलाप्रतीक्षामचरन् विलीनाः ।।३३।।

पौषाछपक्षप्रतिपद्दिनेऽणुं ग्रामं समेत्या बटपल्लि सञ्ज्ञाम् ।।
प्रभोर्गृहं कस्यचिदाविशं श्रीसुरार्चिकोच्चार्हणसाधनेतः ।।३४।।

आलोक्य तत्रानवकाशमूषुरन्ये च तन्मन्दिरचत्वरादौ ।।
भारांस्तथान्यानवरोहयन्तश्चान्यानुरूपालयशून्यभावात् ।।३५।।

तस्मिन् दिने राघवदेवमायाविमोहिताः सर्वजना मदीयाः ।।
प्रमादभाजः सुषुपू रजन्यामहं च कैश्चित् स्थितवान् गृहान्तः ।।३६।।

चोरास्तदायं समयो ध्रुवं न इत्थं विनिश्चित्य शतत्रितेताः ।।
आयन् धनुःखड्गकुठारकुन्तशस्त्राग्नियन्त्रादिमहेतिहस्ताः ।।३७।।

अनेकधास्मञ्जनसाध्वसाय विलक्षणध्वानमलं चरन्तः ।।
शृङ्गादिवादित्रविशेषकैश्च बाणासनैर्बाणगणान् क्षिपन्तः ।।३८।।

सुप्ताः समाकर्ण्य निशीथकाले भयानकध्वानमशेषलोकाः ।।
इदं किमायातमिति ब्रुवन्तः सम्भ्रान्तचित्ता अभवन्विमूढाः ।।३९।।

चोराः समेत्य प्रचुराः समन्तादावव्रिरे घोरतरा गृहं नः ।।
केचिच्च सम्भारसमीपमेत्य शस्त्रक्षतास्तत्र जनानतन्वन् ।।४०।।

भटाः स्थिता ये निकटे समस्तास्ते प्राद्रवन् साध्वसवेपिताङ्गाः ।।
शस्त्रक्षता विप्रजनेऽपि पाले कृष्णाभिधानप्रमुखाः समासन् ।।४१।।

इदं तु सर्वं स्ववशेऽस्ति किन्तु ते सन्ति यत्र प्रभवो यतीशाः ।।
तन्मन्दिरान्तर्वसु तत्समीपे यत् तावदादौ करगं विधेयम् ।।४२।।

पश्चादिदं चत्वरगं प्रगृह्य यास्याम इत्थं निगदन्त आशु ।।
मदास्थितागारकपाटपार्श्वे तेऽथो समायन् कृतभीष्मनादाः ।।४३।।

चोराः कपाटं पिहितं समीक्ष्य कठोरतोपेतकुठारघातैः ।।
छेत्तुं यदोद्योगयुताः समासन् उद्वेगवानासमहं तथान्ये ।।४४।।

इदं किमायादिह तस्करास्ते भित्वा कपाटं ध्रुवमागताः स्वम् ।।
सम्बाध्य मध्वार्चितदेवतार्चादिकं गृहीष्यन्ति न संशयोऽत्र ।।४५।।

न कोऽपि योगो मम भासतेऽत्र करस्थवत्सर्वमिहास्ति तेषाम् ।।
न रोधकाः सन्ति किमत्र कार्यं सर्वेश्वरेच्छास्ति यथा तथा स्यात् ।।४६।।

श्रीस्वामिपादाब्जसदारतस्य कुतो ममापन्महती समागात् ।।
इत्थं ममालोचयतः प्रतीतः श्रीस्वामिनामस्मृतिरूपयोगः ।।४७।।

धैर्यं ततोऽहं समवाप्य मन्त्रमनिष्टकक्षाग्निमभीष्टदाने ।।
कल्पद्रुमाभं शतवारमेतं भक्त्या जपं चोरभयार्थहेतोः ।।४८।।

श्रीसत्यनाथाक्षरभाजमादौ स्वाम्यक्षरा शोभितमध्यभागम् ।।
श्रीपादशब्दश्च ततो गुरुभ्यो नमोन्तभागं परमं रहस्यम् ।।४९।।

Rarest Archiver

आवर्तितो मन्त्र वरो यदाऽयं चोराः कपाटं प्रकुठारघातैः ।।
स्थित्वान्तरायन् जनतातिभीता निजाः समुद्विग्नमनास्तदासीत् ।।५०।।

स्वभाषया यच्छत यच्छतार्थमिति ब्रुवन्तो बहुवारमेते ।।
अभ्येत्य मां सम्परिवार्य चोरा अताडयन् हेति वरैर्निशातैः ।।५१।।

श्रीस्वामिराजोत्तमनाममन्त्रजपप्रभावात् विहतस्वकृत्याः ।।
आसन् समस्ता अपि हेतयस्ताः प्रह्लादयुक्ता इव दैत्यमुक्ताः ।।५२।।

विव्याध निस्त्रिंशवरेणकश्चिज्जनेऽखिले पश्यति तत्र गेलम् ।।
न छेद आसीत् गुरुराजनामजपप्रभावादतिचित्रमेतत् ।।५३।।

अताडयत् प्रासवरेण चान्यो जनेऽखिले पश्यति तत्र गेलम् ।।
न छेद आसीत् गुरुराजनामजपप्रभावादतिचित्रमेतत् ।।५४।।

अन्योऽवधीन्मामुरुमुद्गरेण जनेऽखिले पश्यति तत्र गेलम् ।।
पीडा न चासीद्गुरुराजनामजपप्रभावादतिचित्रमेतत् ।।५५।।

कश्चिन्महादीपिकया प्रदग्धुं संयोजयामास मुखं मदीयम् ।।
न दाह आसीद्गुरुराजनामजपप्रभावादतिचित्रमेतत् ।।५६।।

शालान्तराले पृथुदीपयुक्ते सुरार्चिकापूर्वपदार्थजातम् ।।
अमूल्यकं दस्युजनाः पुरस्थं सर्वेशमायाबलमोहितास्ते ।।५७।।

पुरा न गृण्हन्ति न लक्षयन्ति पुरान्धवर्गा इव कार्यमूढाः ।।
श्रीस्वामिराजोत्तमनाममन्त्रजपप्रभावादतिचित्रमेतत् ।।५८।।

पुनः पुनर्यच्छत यच्छतार्थामिति ब्रुवाणानिति तानवोचम् ।।
दस्यून् ततोऽहं किमिहास्ति किन्तु सर्वं बहिस्तिष्ठति गच्छताशु ।।५९।।

प्रत्यर्थभावेऽपि बहिस्ततस्ते रघूत्तमोत्पादितभीतिपूर्णाः ।।
अगुर्द्रुतं श्रीगुरुराजनामजपप्रभावादतिचित्रमेतत् ।।६०।।

सर्वेऽपि गुञ्जामितमप्यनाप्य स्वर्णं द्रवन्ति स्म गृहीतकण्ठम् ।।
प्रत्यर्थिनुन्ना इव वेपिताङ्गा दरातिरेकादतिचित्रमेतत् ।।६१।।

तदाजिरस्थं पृथुशातकौम्भकुम्भं गृहीत्वापि विसृज्य कश्चित् ।।
समाद्रवच्छ्रीगुरुराजनामजपप्रभावादतिचित्रमेतत् ।।६२।।

यदा सचैलं कलधौत पात्रं हस्तेन धृत्वापि चरन्विचैलम् ।।
तत्याज योवह्निरिवादहत्तं तदेशधाम्नस्तदिति प्रभाति ।।६३।।

त्यक्त्वा करस्थं स हि हेमपात्रं स्वीकृत्य पात्रं कथिकानुकूलम् ।।
यदाद्रवत् ज्ञाः पतिनाममन्त्रजपप्रभावो भुवि केन वर्ण्यः ।।६४।।

त्यक्त्वा वरोर्णाम्बरभारमन्यः काषायवासोभरमाददानः ।।
अगात्तयोरग्रगयोर्गुरुश्रीनामप्रभावादतिचित्रमेतत् ।।६५।।

स्वस्वामिरागातिशयप्रमोदात्तान्निग्रहीष्ये द्रवतोऽपि दस्यून् ।।

Rarest Archiver

इत्यंशुकौघं स्वयमेव चोरशिरः समारुह्य गतं समूहे ।।६६।।

काषायताहेतुशिलोरुभारं स्वीकृत्य मे कामितलाभ आसीत् ।।
इति भ्रमन् कश्चन भारमन्यं त्यक्त्वोपयुक्तं समगादहो तत् ।।६७।।

वार्तामिमां राष्ट्रगता निशम्य लोकाः समासन् भृशविस्मयाढ्याः ।।
तत्तत्पुरस्थाः प्रभवोऽथ चोरान् निचाययन्ति स्म तदा स्वभृत्यैः ।।६८।।

प्रगृह्य सन्दर्शयितुं जनानां दस्यूनिवैभिः सह ये गतास्ते ।।
रोषेण रक्ता इव भूपतीनां पटा भटाभाः समदर्शयंस्तान् ।।६९।।

य आदवान्याह्वयराजधान्यां प्रभूत्तमः केशवराजनामा ।।
विकर्णपूर्वान्यितमान् विधातुं कृतागसस्तान् समनो वितेने ।।७०।।

श्रुत्वेति वार्त्तां समयापयं तं विलेख्य पत्रं त्वमपप्रतीकान् ।।
तान् मा कुरुष्वापयशो भवेन्नो मदाज्ञयैवेदमशेषमित्थम् ।।७१।।

पत्रं तदालोक्य विधान्तरेण सोदण्डयत्तान् परिहर्तुमागः ।।
सोपायनं स्वापहृतान् पटांस्तैः प्रत्तान् मदङ्कं समयापयच्च ।।७२।।

तद्यापितान् मे पुरतो यदा तानानीय संस्थापयति स्म कश्चित् ।।
भटा इवारीन् परिभूय रागादिवानमन्तो व्यलसन्नुपेत्य ।।७३।।

अहो मदीयाः प्रभवोऽत्यलौकिका यन्नाम मन्त्रोच्चजपप्रभावतः ।।
भियं दधाना हृदयेषु शत्रवः पराद्रवन्नाशु दिशो दशाखिलाः ।।७४।।

मन्दस्मितेन्दुवदनो नन्दया माससादरम् ।।
वृन्दं सतां स कर्मन्दिवन्दितो वचनैरिति ।।७५।।

तस्यामप्यतिधृतिशालिनं दशायां पूर्णश्रीगुरुकरुणासुधाभिषिक्तम् ।।
स्वीयश्रीकरगुरुराजभक्तिपूर्णं सन्तः ते नुनुवुरमुं महातपोब्धिम् ।।७६।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्या युजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तद्गुणसारलुब्धकविभिः सर्गस्तृतीयोऽभवत् ।।७७।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे तृतीयः सर्गः

Rarest Archiver

।। चतुर्थः सर्गः।।

मन्दहासेन्दुमहसा नन्दयन्नादरादसौ ।।
भूदेवानवदद्धूयः सत्यनाथेन्द्रसत्कथाः ।।१।।

अञ्जसा कीर्तयन्तं तं मञ्जुलागौरवीः कथाः ।।
कञ्जपत्राक्षमभितस्तेऽञ्जलीता विरेजिरे ।।२।।

कदाचिद्धर्मनगरीं गोदाप्लवचिकीर्षया ।।
सदावासामयां धर्मनिदानं हरिगे गुरौ ।।३।।

अवसन् कतिचिन्मासांस्तत्र वासोचिते मठे ।।
श्रीमद्गुरुप्रसादेन परिपुर्णमनोरथः ।।४।।

कदाचिन्निद्रितस्यासीन्निशीथे सहसा मम ।।
प्रबोधस्तत उत्थाय सूपाविश महं तदा ।।५।।

करपृष्ठगतात्यल्पक्षतजातेन पूरितम् ।।
गर्तं रक्तप्रवाहेणापश्यमभ्याशगं तदा ।।६।।

क्षतप्रविष्टवातेन करपृष्ठं समेधितम् ।।
दृष्ट्वा संविस्मितोऽत्यन्तं रक्तक्लिन्नांशुकादि च ।।७।।

स्वामिराजोपकारस्यानुसन्धानमभूदलम् ।।
चोरागमनवेलायां सञ्जातस्य तदा मम ।।८।।

हेतुं विनापि जातं मत्करपृष्ठक्षतं कथम् ।।
अभूत् कथञ्च रक्तौघस्तस्मादल्पान्महानहो ।।९।।

यदा चोराः समायाताः नानानिशितहेतिभिः ।।
प्राहरन् मां तदा किं किं न सम्भाव्यं ममाभवत् ।।१०।।

तिलशो निश्चितं कायखण्डनं खरहेतिभिः ।।
केन वारयितुं शक्यं विना श्रीस्वाम्यनुग्रहम् ।।११।।

यदि तर्ह्यायुधैः छेदः प्रवहेच्छोणितापगा ।।
यतोऽत्यल्पक्षतोत्थेन गर्तो रक्तेन पूरितः ।।१२।।

न मनागपि तत्रासीत् यावत् सम्भाविता तदा ।।
श्रीस्वामिराजनामाख्यमनुराजप्रभावतः ।।१३।।

इति स्वाम्युपकारं तमनुसंहितवान् मुहुः ।।
यदान्यदुष्करं चित्रं लालनीयं महात्मभिः ।।१४।।

पूर्वमानाधिकं मानं प्राप्तं क्षतनभस्वता ।।
करपृष्ठं तदैवासीद्यथा पूर्वमहो बुधाः ।।१५।।

सहसाविद्रुता निद्रा भद्रा मां प्राविशत्तथा ।।
तदातिशयिता श्रीमत्स्वामिराजप्रसादतः ।।१६।।

शर्वर्यां समतीतायामनुभूतमनुस्मरन् ।।

Rarest Archiver

निशीथे न्यगदं भूयो भूयः कौतूहलाकुलः।।१७।।

मदीयां वाचमाकर्ण्य मठीयाः समभूदिदम् ।।
कथं क्षतमथो किं स्यात् किं वा कार्यमितः परं ।।१८।।

एतैर्यदीर्यते तत्तु गुरुभक्त्यैव नान्यथा ।।
अतो विचार्यमेवैतदिति चिन्तायुजो भवन् ।।१९।।

ततो मठीयैराहूताभिषजोऽत्रा गताः क्षतम् ।।
निशाम्यैतदशेषञ्च निशम्येति समब्रुवन् ।।२०।।

निशीथेऽन्योन्यकलहपन्नमूषककर्त्तृकम् ।।
इदं क्षतमहो नूनमत्यर्थानर्थकारकम् ।।२१।।

अवगाहो ध्रुवं त्याज्यो यदि चावश्यकस्तदा ।।
उष्णांभसैव कर्त्तव्यो न शीतलजलेन सः ।।२२।।

अवश्यमौषधेनेदं लिप्तं चेत् क्षयमेष्यति ।।
तस्माद्दिव्यौषधेनैतल्लिम्पामो वयमञ्जसा ।।२३।।

पथ्यं तथा प्रकर्त्तव्यं यदि नैव विधीयते ।।
नास्माकमपराधस्यादितः स्वैरं विधीयताम् ।।२४।।

इति तद्वचनं श्रुत्वावदं तान् क्षतहेतुकम् ।।
दुःखं स्वामिप्रसादेन नासीदस्ति भविष्यति ।।२५।।

द्रष्टव्यमद्यश्रीस्वामिमाहात्म्यं शीतलाम्भसा ।।
अवगाहं तथापथ्यं कुर्यामेव न संशयः ।।२६।।

बुधा मद्वचनेनेति ततो वैद्या निरुत्तराः ।।
मठाद्बहिर्विनिर्याताः मठीयानवदन्निति ।।२७।।

प्रभवस्तेन श्रृण्वन्ति ध्रुवमस्माकभाषितम् ।।
नास्माकमपराधस्यादेतत्तु कठिणं क्षतम् ।।२८।।

शीतलेन जलेनाहमवगाह्याथ तद्दिने ।।
अचरं भोजनं स्वैरं अनुवासरवद्ध्रुवम् ।।२९।।

छलार्युपपदोपेतनृसिंहाचार्यनामकाः ।।
अछलादरसम्पूर्णाः स्वच्छाचारमनोहराः ।।३०।।

क्षपायां मन्त्रतन्त्रज्ञाः दिने तस्मिन् मुदन्तकम् ।।
उदन्तं नन्दनद्वारा ते श्रृण्वन् मामकं ततः ।।३१।।

अप्यशक्तास्तदागन्तुं ज्वरबीजोपवासतः ।।
निशायामेव मामागुः स्थविरास्ते शनैः शनैः ।।३२।।

श्रुत्वा ते मन्मुखात् सर्वं गुरुभक्त्यैतदुच्यते ।।
किन्त्वस्ति वेदना नूनमिति मत्वा तदा ब्रुवन् ।।३३।।

नूनं भवत्यदो नाथाः क्षतं मूषकनिर्मितम् ।।

Rarest Archiver

अनर्थदायि तन्नूनं तूर्णं तस्मात् प्रयत्यताम् ॥३४॥

दासोऽहं भवतां तूर्णं तैलमानीयतामिदम् ॥
क्षतं क्षतिमियात्तेन मन्त्रितेन न संशयः ॥३५॥

इत्युदीर्य तथा तैलमभिमन्त्र्य तदामुना ॥
अलिम्पन् करपृष्टं त आदराच्चाभ्यमन्त्रयन् ॥३६॥

स्वामिराजप्रिया एते लोकपूज्या वयोगताः ॥
इति दाक्षिण्यतस्तूष्णीमभूवमिव सम्मतः ॥३७॥

अभिमन्त्रिततैलेन सूपलिप्याभिमन्त्र्य ते ॥
करपृष्टक्षतं गन्तुमागारं निरगुर्मठात् ॥३८॥

श्रीपादस्वामिराजानां महिम्नैव मनोरथः ॥
इष्टाप्त्यनिष्टहान्याख्यः सर्वोऽपि भवति ध्रुवम् ॥३९॥

इत्थं सकललोकानुभवसिद्धं यतस्ततः ॥
किं तैलेन च मन्त्रेणेत्यब्रुवं वचनं तदा ॥४०॥

ततो गोमयमानीय घर्षयित्वा मुहुर्मुहुः ॥
अतैलं करपृष्ठस्थं क्षतमक्षालयं जलैः ॥४१॥

ततः स्वामिप्रसादेन विकारो न मनागपि ॥
अभूदप्यक्षताङ्कं मे पाणिपृष्टतलं बत ॥४२॥

निर्वर्ण्य पाणिपाश्चात्यतलमक्षतलक्षणम् ॥
धर्मपुर्यालया मग्ना विस्मयातिशयार्णवे ॥४३॥

यान्निर्मितोपकारानुसन्धिमाहात्म्यमीदृशम् ॥
किं वर्णनीयं तच्छ्रीमत्स्वामिमहात्म्यमद्भुतम् ॥४४॥

अथ समितिनिविष्टं तं बुधाः शिष्टशिष्टं गुरुपदरतिजुष्टं तत्कथानित्यतुष्टम् ॥
प्रमुदितकमलेष्टं प्राणिकारुण्यपुष्टं विरचितसकलेष्टं तुष्टवुः पिष्टदुष्टम् ॥४५॥

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ॥
श्रीमत्सरुद्दुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
संश्लाघ्ये गुणसारलुब्धकविभिः सर्गश्चतुर्थोऽभवत् ॥४६॥

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे चतुर्थः सर्गः

Rarest Archiver

।। पञ्चमः सर्गः।।

नित्यः प्रसन्नास्यविधुः कदाचित् सत्याभिशब्दादिनवाख्यतीर्थः ।।
अत्यद्भुतं स्वामितपःप्रभावं भक्त्यद्भुतो भक्तजनानभाणीत् ।।१।।

बुधा अहो पावनधर्मपुर्यां विधाय वासं धिषणे हरिस्थे ।।
कन्यागतेऽस्मिन् वरकृष्णवेण्यां वगाहनार्थं निरगां ततोऽहम् ।।२।।

श्रीकृष्णवेणीवरतीरराजद्ग्रामं द्विजाग्र्यालयराजिरम्यम् ।।
कोलूरुनाम प्रथितं समेत्य तत्रावसञ्चारुगृहे सुखेन ।।३।।

मासाननेकान् सुरसिन्धुपूर्वसमस्ततीर्थालयकृष्णवेण्याम् ।।
अश्रान्तमत्यन्तमुदा विगाह्य श्रीकान्तपूजामचरं हि तत्र ।।४।।

एवं वसंस्तत्र वलक्षपक्षे रक्ताक्षिसंवत्सरशुक्रमासे ।।
तिथौ नवम्यां क्षितिसूनुवारे नद्यां वगाहाद्यचरं स्वकृत्यम् ।।५।।

अर्चामुपक्रम्य सुरार्चिकानां मध्याह्नकाले हरये निवेद्यम् ।।
श्रीरामवेदेश्वरपूर्वनानारूपात्मने प्रार्पितवानथासम् ।।६।।

तदा मठाभ्याशगविप्रवेश्म धनञ्जयोऽलं लगति स्म लोके ।।
अत्यद्भुतं स्वामितपःप्रभावं व्यक्तं विधातुं रघुनाथनुन्नः ।।७।।

चित्रात्यसङ्घट्टितघट्टनातिपटीयसी या मयि शक्तिरस्ति ।।
तां तादृशीं भक्तगतां निरीक्ष्य कैमुत्यरीत्या मयि तामवेत ।।८।।

इत्थं सतो ज्ञापयितुं दयालुः श्रीरामदेवेन नियोजितोऽग्निः ।।
जाज्वल्यमानोरुशिखो मठीयमहानसं प्राप्य बतैधतालम् ।।९।।

जाज्वल्यमानो ज्वलनः समेतो वातेन सख्या विहरंस्तदानीम् ।।
महानसागारगवंशदाहसञ्जातफट्फट्ध्वनिभीषणोऽभूत् ।।१०।।

तदैव कोलाहलनिस्वनोऽभूत् ग्रामे महानण्डकटाहभेदी ।।
मठीयलोकेष्वभवच्च हाहाकरो महांश्चित्तविदारकोऽलम् ।।११।।

तदैव मत्प्रीत्यतिरेकपात्रं विद्याद्यधीशाभिधया प्रसिद्धः ।।
बुधो मदीयः समुपाद्रवन्मां दाहप्रबोधाय रवं वितन्वन् ।।१२।।

निशम्य सर्वं युगपत्स्वनन्तं निशाम्य मत्पार्श्वगतं प्रकाशम् ।।
मनोजवाभ्यागतचित्रभानोर्निर्वेदनीयार्पणमत्यजं हि ।।१३।।

तूर्णं धनुर्बाणकिरीटपूर्वैरर्चाश्चतस्रः सहपेटिकासु ।।
अस्थापयं संपुटमप्यथैकमन्तःश्रुतीशोपलमस्तवस्त्रम् ।।१४।।

गृहीतपेटीत्रितयेन विद्याधीशेन तत्रैकतमां प्रगृह्य ।।
पेटीं बहिर्गन्तुमथारभेऽहं वगाहनद्वारमयात्तदग्निः ।।१५।।

ततो महाद्वारत एव कृच्छ्रात् बहिर्यदाहं निरगां तदैव ।।
जाज्वल्यमानोज्वलनोऽतिवेलं व्याप्नोत्तदप्युज्ज्वलकीलिकाभिः ।।१६।।

Rarest Archiver

सैकश्रुतीशोपलवंश्यराममूर्तिस्तु देशान्तरगा तदासीत् ॥
नियोगदेशान्तरयातसत्याधीशार्चिता दिग्विजयप्रदात्री ॥१७॥

तृणैः सवंशैरुरुदारुषण्डैः छायाघनाकारि मया यतोऽलम् ॥
मठान्तरालाजिरसङ्गिसौरातपातिबधापरिहारहेतोः ॥१८॥

तद्व्याप सर्वत्र शिखी ततो ना न कोऽपि किञ्चिच्चलितुं शशाक ॥
अन्वाययुर्मामतिसङ्कटेन तदा मठीया वसनद्वयेताः ॥१९॥

सौरांशुसन्तप्तरजा धराऽधो खरातपश्चोपरि नो बबाधे ॥
जाज्वल्यमानोज्वलनः समन्तात्तदाद्भुतं जातमभूतपूर्वम् ॥२०॥

समन्ततः स्थातुमशक्यभावात् क्रोशार्धदेशं गतवानशेषैः ॥
सार्धं द्विजैर्द्वे घटिके प्रगृह्य पेटीश्च तत्र स्थितवांस्तदाहम् ॥२१॥

प्राञ्चो नवीना अपि पुस्तकाद्याः दैवास्तथार्था बहुनोदितेन ॥
किमस्ति सर्वेऽपि पदार्थसार्था लाग्ना महाग्नावभवंस्तदानीम् ॥२२॥

दावोपमानो ज्वलनो यदाभूच्छान्तो मनाग्ग्राममुपेत्य विप्रैः ॥
अगां शिवागारममा तदानीम् शनैः शनैः केश्चन विश्रमाय ॥२३॥

शिवालयं स्वच्छतलं प्रविष्य शिवप्रदं तत्र तदा निषण्णः ॥
श्रीस्वामिराजाङ्घ्रिसरोजयुग्मं शिवप्रदाय्यस्मरमञ्जसाहम् ॥२४॥

सीतार्चिका मूलरघूत्तमार्चा रामार्चिका दिग्विजयाभिधा च ॥
अर्चाः प्रसन्नादिमविठ्ठलाख्येत्येवं चतस्रः प्रतिमाः पुराण्यः ॥२५॥

व्यासार्चिका सम्पुटमप्यहो श्रीस्वाम्यङ्घ्रिसेवाबलतः तदेतत् ॥
शिष्टं समासीदिति यः प्रमोदः तदावधिर्नैव बभूव तस्य ॥२६॥

श्रीपूर्णबोधादिजगद्गुरुश्रीकरार्चिता उर्वरिताः सुरार्चाः ॥
इति प्रमोदादितराखिलार्थदाहेऽपि नेषन् मम दुःखमासीत् ॥२७॥

करास्यसन्ताडनसम्भवोऽभूत् ध्वानो मठान्तः सहसा तदैव ॥
माहानथो केचन सञ्चरन्तो मठान्तिके तं स्वनमाश्वश्रुण्वन् ॥२८॥

जाज्वल्यमानग्निनिरुद्धमार्गा विप्रा बहिर्निष्क्रमणासमर्थाः ॥
लग्नामठान्तर्बत केचनेति द्विजा विनिश्चिक्युरथो मठीयाः ॥२९॥

तज्जीवनस्वान्तयुतास्ततस्ते प्रारभ्य शर्वालयमम्बुनालम् ॥
क्लिन्नां चरन्तः पृथिवीं प्रतोल्यां सौधात्मकं कुड्यमवापुराशु ॥३०॥

श्रीपत्यलङ्कारनिवेदनीयनिशान्तभित्तिं समवाप्यविप्राः ॥
अगुः पुरस्तादपि नीरसेकात् कोशालयाभ्याशगकुड्यपार्श्वम् ॥३१॥

यन्त्राणिमोक्तुं रचितान्यभूवन् तद्भित्तिकायां विवराणि यानि ॥
तन्यस्तदृग्भिर्ददृशुः ततोऽन्तस्थितान् द्विजान् भूविबुधा इमे हि ॥३२॥

शेषादिकां यः पुरुषोत्तमाख्यामधत्त तं ते ददृशुः तदादौ ॥
ददर्श तान्वाचमुवाच सोऽपि लग्नोऽहमस्म्यग्निशिखान्तराले ॥३३॥

ममान्तिके तिष्ठति पादपीठयुग्मद्वयं स्वामिपदाङ्कशोभि ॥

Rarest Archiver

मृत्कृष्णपूर्वा अपि सन्ति पञ्चलग्रामहाग्राविहभूमिदेवाः ।।३४।।

स्वल्पावकाशः समभूद्यतो नस्तज्जीवनं कालमियन्तमासीत् ।।
अद्यापि तापः प्रचुरोऽस्ति वह्नेर्भवत्यलं सङ्कटमद्य विप्राः ।।३५।।

आस्माकयत्नेन न जीवनं नो यथाकथञ्चिद्भवतां प्रयत्नः ।।
स्यात्तर्हि नो निष्क्रमणं बहिः स्यात् प्रयत्यतामाशुतरां बतेति ।।३६।।

भित्वा खनित्रैरथ साहसात्ते तां भित्तिकां सौधमयीमभेद्याम् ।।
गतागतार्हं व्यधुराशु रन्ध्रमथान्तरा ये निरगुः स्म तेन ।।३७।।

विशालकोशालयशालिका या गोपानसी तत्र विराजमाना ।।
सप्तार्चिषाभूत् प्रचिता तदैव जाज्वल्यमानेन शिखासमूहैः ।।३८।।

तदैव केचिद्भृशसाहसेन जलाप्लुतस्वीयशिरोमुखाङ्गाः ।।
जाज्वल्यमानज्वलनातिभीताः कोशालयद्वारसमीपमायन् ।।३९।।

सशृङ्खलाकीलकपाटरुद्धं कोशौकसोर्द्वारयुगं समीक्ष्य ।।
वियोजकं कीलयुगस्य तेऽत्रा(कपाटयोस्तेऽ)नवेक्ष्यमाणा अभवन्सचिन्ताः।।४०।।

अमी व्यकर्षन्नथ कीलयुग्मं वियोजकेनापि विना करेण ।।
यदा तदा कीलयुगं वियुक्तमासीदहो स्वामितपःप्रभावात् ।।४१।।

तदा मुदा वायुजवेन विप्रा अर्थान् समस्तान् वरपुस्तकाद्यान् ।।
कोशालयस्थानतिसाहसात्ते निष्कासितान् संव्यधुरद्भुतं तत् ।।४२।।

पाटीरपालर्धममी तदानीं सद्गोपिकाचन्दनखण्डषण्डम् ।।
कर्पूरसम्पूरितवंशपात्रे विनाखिलार्थान् बहिरानयन् स्म ।।४३।।

अवाप्नुतां मोहमहो चिरं तौ गोटूरुशब्दोपपदौ तदैव ।।
द्वौ भूसुरौ मेलुगिरीरितः श्रीनिवासनामा च तदग्नितप्तौ ।।४४।।

आसायमेतौ गतबह्यबोधौ शवाभकायौ प्ररुदस्वकीयौ ।।
अजीवतां स्वामितपःप्रभावादशक्य संभावनजीवनौ हि ।।४५।।

देवार्चिकास्थापनमन्दिरस्य पाश्चात्यभागं समुप्रेत्य शिष्याः ।।
भित्वा खनित्रैरथ भित्तिकां तां समाविशन् केचन तग्दृहान्तः ।।४६।।

तदा शिखावान् गृहबाह्यशालां दग्ध्वा प्रविश्यान्तरवेस्म दग्धुम् ।।
आरब्धवान् तादृश कृष्णवर्त्ममध्येऽविशन् साहसतो द्विजास्ते ।।४७।।

अनर्घ्यदेवास्तरणाद्यशेषपदार्थजातं पृथिवीसुरास्ते ।।
अथानयन्नुर्वरिता पदार्था ये ते ध्रुवं स्वामितपःप्रभावात् ।।४८।।

यद्वाससा देववराम्बराणि बद्धान्यभूवन्नदहत्तदग्निः ।।
नेषत्तदन्तर्वसनानि तत्र चित्रं जनानामभवत्तदानीम् ।।४९।।

दिवावशिष्टोऽभवदेक एव यदा मुहूर्तोऽग्निरभूत्रिपादः ।।
स्वदग्धदेवार्चनमूर्ध्वभागप्राछादनाग्र्यापतनेन शान्तः ।।५०।।

शिष्टैकपादं ज्वलनं जलौघैः संसिच्य संशान्तसमी विधाय ।।
मृद्भूतिपूर्वप्रकरैरदृश्यानमार्गयस्तत्र ततोऽमरार्थान् ।।५१।।

Rarest Archiver

एकं नवीनं वरदेववस्त्रं वस्त्रञ्च निर्माल्य विसर्जनाद्यात् ।।
पश्चाच्छ्रुतीशोपलसम्पुटोर्ध्वप्राछादकं प्रोतसुमौक्तिकालि ।।५२।।

सीतार्चिकाया विमला प्रवालमालान्तरालोज्वलवृत्तहैमाः ।।
देवार्थसंस्थापनपेटिकाश्च चैलानिशङ्खादिकवेष्टनानि ।।५३।।

नृसिंहराजेन च वेङ्कटादिपत्याह्वयेन प्रभुणा प्रदत्ते ।।
परिस्फुरन्त्यौ मणिभिर्महत्यौ रामार्चिकापाण्युचिते विभूषे ।।५४।।

तथा महाभर्ममयातपत्रे समुल्लसद्यच्छिखरं तदर्धः ।।
इत्येत एवात्र तदा पदार्था दग्धा अभूवन् खलु पिष्टपिष्टाः ।।५५।।

मुक्तातपत्रप्रचितोरुरत्नछत्रादिका उर्वरिताः पदार्थाः ।।
अनग्निदाहं गुरुराजपूर्णतपःप्रभावेन न संशयोऽत्र ।।५६।।

श्रीस्वामिराजोरुतपःप्रसन्नौ रामश्रुतीशावखिलावनेन ।।
अत्युद्भुताघट्टितघट्टनातिपटीयसीं दर्शयतः स्म शक्तिम् ।।५७।।

अरक्षतां स्वामितपःप्रसन्नौ यद्व्यासरामौ शतभूमिदेवान् ।।
श्रीस्वामिपादाब्जगतीन् सहार्थैः तस्मादवाप्तं सुकृतं महत्तैः ।।५८।।

भृशं प्रसन्नेन रघूत्तमेन व्यक्तीकृतं स्वामितपःप्रभावम् ।।
प्रत्यक्षदृष्टं भुवनाद्भुतं तं कविः प्रभुर्वर्णयितुं भवेत्कः ।।५९।।

परिछदाद्युल्लसितालयन्तं वैश्वानरो भक्तमहादयो यत् ।।
प्रीत्याददे तत्र सुरेन्द्रसद्मनिभोऽभवच्चित्रमठप्रबर्हः ।।६०।।

यस्तत्र वज्राकरवेङ्कटेश इति प्रसिद्धोऽधिकृतः प्रभूच्चः ।।
आकारयत् प्राक्तनतोऽप्यनेकगुणाधिकं तं मठवर्यमेषः ।।६१।।

इत्याद्यैः स्वगुरुकथासुधारसौघैः सत्याभ्यादिमनवनामतीर्थराजः ।।
भक्त्यानिर्मितकरसम्पुटान् बुधौघानासिञ्चन्ननु भवयघर्मकालतप्तान् ।।६२।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्या युजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तग्दुणसारलुब्धकविभिः सर्गोऽभवत् पञ्चमः ।।६३।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे पञ्चमः सर्गः

Rarest Archiver

।।अथ षष्ठः सर्गः।।

आरभ्याश्रममञ्जसा स्वविहिताचारः कुपक्षिव्रजा-
क्षोभ्यः क्षुण्णतदीयपक्षनिकरः कीर्त्या तताशोमहान् ।।
हंसः क्रोधनहायने समुचितान् मासानवात्सीन्मुदा
कृष्णातीरमरूरुसंवसथके सत्याभिपूर्वाह्वयः ।।१।।

यतिकुलतिलकं तं चोदयामास सम्यक्
रचितसकलतीर्थक्षेत्रयात्रां कदाचित् ।।
रघुकुलतिलकाग्र्यो गच्छ काशीमिदानी-
मिति निजभजकाग्र्यं रामदेवस्तदानीम् ।।२।।

सत्याभिनवतीर्थश्रीपादोऽवादीत्तदा मुदा ।।
कदाचिद्विदुषां वृन्दमित्यानन्दप्रदं वचः ।।३।।

श्रीरामवेदेश्वरदेवयात्रा सुदुर्लभा भूरिशुभेतरेषाम् ।।
काश्यादियात्रामितपुण्यदात्रीत्यशेषसच्छास्त्रविनिर्णयोऽयम् ।।४।।

अदुर्लभेऽयं भवतां समासीत् समागतानां विषयात् स्वकीयात् ।।
सुदुर्लभा मेऽत्र सदा स्थितस्य प्रतीयते श्रीरघुनाथयात्रा ।।५।।

अनुग्रहात् पूर्णतमाद्गुरूणां मनोरथो मे परिपूर्ण आसीत् ।।
एनां विनातोऽत्र मयैव योग आलोचितेऽभादिति योगराजः ।।६।।

सत्याधीशे देवतार्चां निधाय काशीं यायां यद्यहं पूर्णवाञ्छः ।।
काशीयात्रा गोचरो यः समासीत् सङ्कल्पश्च स्वामिराजां भवेत् सः ।।७।।

इत्युक्त्वा बुधसमितिं समस्तभारं न्यस्य श्रीस्वकरसरोजजे यतीशे ।।
काशीं श्रीविबुधधुनीयुतां प्रतस्थे सत्तीर्थो विजयदशम्युदीर्णघस्त्रे ।।८।।

हंसमंशव इवोत्तमसङ्गोऽलाभ्यदृष्टचर इत्युरुमोदाः ।।
अन्वयुः प्रथितवैष्णवलोकास्तं तदा विविधचक्रनिवासाः ।।९।।

मोदात्ततो यान् पथि धर्मपुर्यां गोदावरीमेत्य चरन् स्वकृत्यम् ।।
मोदं वितेने सुरभूसुराणां तोदं द्विषां तत्र निजक्रियाभिः ।।१०।।

महीरूहाद्यैर्विविधैर्गभीरं महीधरं सिंहमतीत्य तास्ताः ।।
महीनदीरेत्य समज्जनादिमहिष्ठकृत्यानि चकार तत्र ।।११।।

स नर्मदामेत्य नदीं तपस्वी सुशर्मदां तत्र विगाह्य नद्याम् ।।
स्वकर्मकृत्वा समगात् प्रयागं दुष्कर्मविध्वंसकतीर्थराजम् ।।१२।।

स वीक्ष्य गङ्गां विलसत्तरङ्गां नदीषु तुङ्गां यमुनादिसङ्गाम् ।।
कृताघभङ्गां हरिपादसङ्गां ननाम हृष्टः पुलकाङ्किताङ्गः ।।१३।।

तत्र क्षेत्रे विधिविदधिको देवनद्याप्लवाद्या
धूतावद्याविदधदनिशं लोकचित्राः क्रियाः सः ।।
माभर्तारं सुकृतफलदं क्षेत्रनाथं च वेणी-

Rarest Archiver

माभर्तारं विभुधतटिनीं प्रार्च्यामास भक्त्या ।।१४।।

काशीमेत्याशेषतीर्थेष्वथायं स्नात्वा जप्त्वा प्रार्च्य देवांस्तदीशान् ।।
बिन्दूपेतां माधवाख्यां दधानं विष्णुं भक्त्या चार्चयद्विश्वनाथम् ।।१५।।

ततो गयां गतो महान् सफल्गुसिन्धुपुष्करे ।।
विगाह्य विष्णुपादमाननाम यान्निशामयन् ।।१६।।

गयायाञ्च काश्यां प्रयागे यतीशश्चकार क्रिया या अदृष्टाश्रुतास्ताः ।।
न शक्याः प्रवक्तुं च संस्मर्त्तुमन्यैर्न शक्या विधातुं किमु स्मेति वाच्यम् ।।१७।।

दूरीकृत्य महान्तरायनिकरं श्रीमान् हनूमान् महान्
लङ्काख्यां पुरमेत्य रामरमणीं सीतामिवावेक्ष्य सः ।।
श्रीसत्याभिनवः समेत्य यतिराट् काश्यादिपुण्यस्थलीं
दृष्ट्वा देवतरङ्गिगणीं प्रमुदितो धन्यं स्वमामन्यत ।।१८।।

श्रीरामवेदाधिपदेवयात्रां करिष्य इत्येष ततो यतीशः ।।
सङ्कल्प्य रामं हनुमानिवागात् कोलूरुगौ राघववेदनाथौ ।।१९।।

समेत्य रामं हनुमानिवाथो रामश्रुतीशौ कमलादिवन्द्यौ ।।
संवीक्ष्य सन्नम्य समाननन्द चित्रोपहारार्पणपूर्वमेषः ।।२०।।

एवं सम्प्राप्तकामः स्वगुरुकरुणया तीर्थवृन्दावनाग्र्यं
गन्तुं सूत्को दयालुः पथि सकलजनान् सम्पुनन् स्वागताद्यैः ।।
गत्वा क्षेत्रोत्तमाहोबलमपि गतवान् वेङ्कटेशं समर्च्य
श्रीकाञ्चीं यान् पुरं श्रीवरदपरिवृढं प्रार्चयामास भक्त्या ।।२१।।

अथ वीरचोलवरसंवसथं स पिनाकिनीतटगतं तमयात् ।।
ऋतनाथनामगुरुराजतनुं पिदधे महीबिल इव स्वनिधिम् ।।२२।।

प्रणमन्नतिदूरतः पुनः पुनरष्टाङ्गविशिष्टचेष्टितः ।।
स ऋताभिनवाह्वयो विशत् तमथात्यादरवारिधिर्मुदा ।।२३।।

श्रीसत्यनाथपदविश्रुततीर्थराजवृन्दावनं भुवनसुन्दरसुन्दरं सः ।।
बद्धाञ्जलिः स्वगुरुभक्तिभरानताङ्गः प्राप्यानमन्नथ समीक्ष्य समाननन्द ।।२४।।

शिल्पीन्द्रकौशलयुतोपलमण्टपाग्र्ये
ग्रावप्रवेकमयसुन्दरवेदिकायाम् ।।
राजच्छिलाविरचितं कृतचित्रचित्रं
श्रीमुद्रिकालसितपुण्ड्रवरादिभूषम् ।।२५।।

नारिकेलादिनानाफलौघांस्ततः स्थापयन् शर्कराद्रिं स तत्पार्श्वयोः ।।
रौप्यरौग्मप्रसूनोत्करान् सङ्किरन्नग्रतः पार्श्वयोरंशुके प्राक्षिपत् ।।२६।।

गुरुप्रसादाप्तसमस्तसम्पदं सम्प्रापयन् स प्रणनाम भाग्यवान् ।।
साष्टाङ्गचेष्टो विनयादिसद्गुणः स्वानन्दबाष्पाक्षियुगो मुहुर्मुहुः ।।२७।।

कमलजजननीशः साम्प्रतं सम्प्रसन्नो
हरिरखिलसुराञ्चानन्दतीर्थादयो मे।।

Rarest Archiver

अपि गुरव इदानीं जन्मसाफल्यमासी-
दिति यतिपतिरेषोऽनुस्मरन्नाननन्द ।।२८।।

ऋताभिनवतीर्थराट् स्वगुरुराजवृन्दावनं
समर्चति पुरार्हणैर्हरिपदाम्बुपूर्वैस्तथा ।।
सुवर्णकुसुमोत्करादिकमिहोपहारैर्यदा
तदुत्सवदृशोदृशौ न हि दृशः परेषां दृशः ।।२९।।

श्रीसत्याभिनवेन्द्रपूजितमभूद्वृन्दावनं तद्यदा
भक्त्यालङ्कृतपुण्ड्रसञ्चयलसच्छ्रीमुद्रिकाद्युज्वलम् ।।
काषायांशुकभूषितं प्रमुदितः श्रीसत्यनाथाधिराट्
प्रत्यक्षोऽभवदर्चनादिव तदा रेजे स्वहस्ताब्जजे ।।३०।।

उरुगुरूपकृतिस्मृतिसम्भवप्रमदसिन्धुतरङ्गविहारिहृत् ।।
कविजनावलिमध्यगतस्ततः स्वगुरुमेष शशंस गुणाकरम् ।।३१।।

वृन्दावनेक्षणामन्दानन्दसान्द्रो यतीश्वरः ।।
कृत्यान्तरं तदा नावैद्गुरुपादादरार्णवः ।।३२।।

वृन्दावने तत्र महं यमेषश्चकार तं द्रष्टुमिवाससार ।।
पिनाकिनीनामधुनी तदानीं तटोपरिष्टादतिचित्रमेतत् ।।३३।।

स्वबन्धुवर्गैः सुरसिन्धुपूर्वैरमायमागादिति सा तदैव ।।
अनागता पूर्वमतिक्रमन्ती तीरं ध्रुवं स्वीयदिदृक्षयागात् ।।३४।।

तस्यास्तटे वीरपदादिचोलवराभिधे संवसथे स मासम् ।।
वासोचिते भूसुरराजिचारावुवास सत्कृत्यरतो यतीशः ।।३५।।

आप्लाव्य नद्यामनिशं सुरार्चावृन्दावनाग्रेऽभिमुखं निधाय ।।
स मण्टपाग्रे गुरुभक्तिशाली प्रापूजयत् तत्करणैर्विचित्रैः ।।३६।।

पिनाकिनीतीरविराजमानवनोल्लसन्मण्टपराजमानम् ।।
श्रीसत्यनाथेन्द्रमिव स्थितं तद्वृन्दावनं प्रार्चयदद्भुतं सः ।।३७।।

निर्माल्यशङ्खोदकतीर्थगन्धैरम्लानसुश्रीतुलसीस्रजा च ।।
प्रसूनुमालांशुकदीपिकाभी रौप्यैश्च रौग्मैःकटिसूत्रवृन्दैः ।।३८।।

नानाविधान्नैः परमान्नभक्षैर्नानाविधैः शाकवरोपदंशैः ।।
लेह्यैरसैर्गव्यपयोघृताद्यैरन्यैः पदार्थैः कदलीफलाद्यैः ।।३९।।

हर्यर्पितैरच्छतमैर्मनोज्ञैः सुखादुभिः पुण्यकरैर्जनानाम् ।।
अनेकजन्मार्जितपापपुञ्जवनालिदावैः पुरुषार्थबीजैः ।।४०।।

आरार्तिकैः पञ्चविधोरुवाद्यैस्तवैरपूर्वैर्गुरुराट्प्रभावैः ।।
प्रदक्षिणैर्दण्डनमस्क्रियागोनिवारणैरञ्जलिपूर्वमञ्जः ।।४१।।
वनं तदान्तस्थित सत्यनाथ श्रीपाद वृन्दावन मुल्ललास ।।
यतींद्र सत्याभिनवार्चितं तद्दृष्ट्वेव तुष्टं प्रसवादिपुष्टम् ।।४२।।

धात्रीकुटाश्वत्थकपित्थभूजैर्मनोरमं सद्बदरीद्रुमैश्च ।।

Rarest Archiver

चूतैश्च जम्बूतरुतिन्त्रिणीभिः सन्नारिकेलैः पनसैश्च सालैः ।।४३।।

जम्बीर खर्जूर्यभिधैर्महीजैरुदुम्बरप्लक्षशमीरितैश्च ।।
मुग्धप्रजालङ्करणोचितोच्चप्रावलधीकारिफलैर्वटैश्च ।।४४।।

निम्बैश्चरम्भाक्रमुकद्रुमैश्च महीरुहैः किंशुकदाडिमाद्यैः ।।
अनोकहैश्चम्पकमल्लिकाद्यैरभ्रंलिहैर्मञ्जुलवंशपुञ्जैः ।।४५।।

चित्रैर्विचित्रैरितरैश्च सालैर्बह्वालवालैः सुविशालमूलैः ।।
विभ्राजमानैर्दलपल्लवोघैः सुवासिताशैः कुसुमैः फलैश्च ।।४६।।

पिकैः शुकैः केकिमुखैरनेकैर्विहङ्गमैर्जातिनिनादरम्यैः ।।
श्रीसत्यनाथेन्द्रजगत्प्रपूज्यगुणावलिस्तोत्रपरैरिवालम् ।।४७।।

फलप्रसूनादिकवैभवं यत् वृन्दावने तद्भवदीयमेव ।।
इतीवविज्ञापयदेतदास्ते वनं प्रकूजद्विजपुञ्ज(राजि)शब्दैः ।।४८।।

हंसेभिमानादिव सत्यनाथे छायाघनन्तो सह तेऽन्यहंसम् ।।
कुतोऽन्यथा विश्रुतहंसपादमात्रस्य नादादवकाशमेतत् ।।४९।।

तपोनिषण्णं मुनिराजसत्यनाथेंद्र माये परितो वनस्थाः ।।
दिगम्बरान् मौनयुतान् मुनीशान् स्थितानहं तांस्तपतः समूहे ।।५०।।

प्रत्यब्दं प्रथमं वसन्तसमयो धर्मान् स्वकालोचितान्
कर्तुं सूक्त इव स्वयं श्रमहरप्रोद्यद्घनछायया ।।
पुष्पैश्चंपकपूर्वकैर्वरफलैश्चूतादिभिस्तं वने
सन्तं मोदयतीह मन्दमरुता दासांस्तदीयानपि ।।५१।।

लोकान् हंसबलेन पीडिततमान् ग्रीष्मेण दृष्ट्वा वनं
तद्धंसाधिपसत्यनाथबलतो जित्वेव तं स्वाश्रितान् ।।
सन्तापं परिहृत्य चारुमरुतासुछायया मल्लिका-
पुष्पाद्यैरपि सत्कृतान् वितनुतेऽहो सत्यनाथाधिपम् ।।५२।।

वर्षास्वेव निशाम्य वृष्टिनिरताङ्कादंबिनीं बर्हिणो
नृत्यन्तीह वने भृशं प्रमुदिताः क्वारे त्वमभ्रावले।।
नित्याष्टापदपूर्ववृष्टिनिरतः श्रीसत्यनाथाम्बुदः
क्वायं हेत्यपहासकारिण इवातीवोरुजातिस्वरं ।।५३।।

हंसप्रीतिरतीव सत्तनुभृतां सर्वेष्टदात्रीध्रुवं
हंसानाममले पयःस्यतितरां प्रीतिर्हि कुर्यां तथा ।।
एवं स्वान्तयुतेव निर्मलपयः सम्पादयन्तीशरत्
तद्धंसाधिपसत्यनाथबहलप्रीत्यै समायात्यथ ।।५४।।

हेमन्तर्तुमथागतं वनगतं श्रीसत्यनाथं मुनिं
नूनं चालयितुं हिमेन तपसो गाढं तदीयादिति ।।
बुध्वा तत्कृतपीडयापि शिशिरोवीक्ष्याचलं तं मुनिं
हेमन्तं हसतीव कुन्दकुसुमैः फुल्लैः स्वकार्याक्षमम् ।।५५।।

Rarest Archiver

इति ऋतुभवपुष्पपल्लवाद्यैर्लसति वनेगुरुराण्मृतिस्थलाङ्कम् ।।
उपलविरचितं समर्च्य सत्याभिनवपदो यतिराट् समानन्द ।।५६।।

कर्मन्दीशस्तत्रैवाथो कर्मन्द्यादींस्तीर्थप्रीत्यै ।।
दिव्यान्नाद्यैस्तृप्तांश्चक्रे श्रीगन्धाद्यालङ्कारेतान् ।।५७।।

कृत्यं भूयोथासौ विदधन्मज्जनजपसुरपूजाद्यम् ।।
भैक्षं व्यचरद्भिक्षूत्तमो निशं यतवाक् भूसुरमध्ये ।।५८।।

सकर्माथोसान्ध्यं विदधदमलोर्घ्यादि यति-
राड् ज्वलद्दीपश्रेणीस्फुरदमरवेष्मान्तरगते ।।
समासीनं रामं विमलकलधौतासनवरे
समानच्चादभ्रैः कुसुमफलपूर्वार्हणवरैः ।।५९।।

विद्याविशारदसभान्तरविष्टरस्थो-
विद्याविशारदवरो रमयद्रजन्याम् ।।
विद्याविलाससहितस्वगुरूत्कथाभि-
र्विद्याधिराजमतविन्मतदीपकस्तम् ।।६०।।

लोकात्यद्भुतपुष्पमण्टपलसद्रौप्याद्भुतान्दोलिका-
मध्येशेषशयं निधाय रमणं लक्ष्म्यास्तदूर्ध्वं मुदा ।।
पौष्पैर्माल्यकुलैरलङ्कृततमं तन्वन्नथाचालय-
द्दोलान्तां यतिराट् पुनः पुनरसौ सद्गीतवाद्यस्वनम् ।।६१।।

खचितकनकदण्डे चामरेचालयन् सद्व्यजनमपि विचित्रं भूय आन्दोलिकां च ।।
सकलजगदधीशं प्रीणयामास रात्रौ श्रुतिरघुपतिपूर्वानिकरूपं हरिं सः ।।६२।।

क्रियासमभिहारेण रजतां दोलिकोत्सवम् ।।
वीक्षमाणोऽपि नातृप्यन् महात्मायमहो अहो ।।६३।।

इत्येष स्वहितमाचरन्नवात्सीत् तद्ग्रामे गुरुचरितोक्तिभिः सदोलम् ।।
स्वानन्दाम्बुधिलहरीविहारलोलस्वानन्दानपि सकलांश्चरन् यतीशः ।।६४।।

श्रीसत्याभिनवाख्यपूज्यचरणान्ते वासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्या युजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये सद्गुणसारलुब्धकविभिः सर्गश्च षष्ठोऽभवत् ।।६५।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे षष्ठः सर्गः

Rarest Archiver

।। सप्तमः सर्गः।।

सत्तीर्थसत्याभिनवेड्यपादकृतं महान्तं महमादरेण ।।
द्रष्टुं यमापू रघुनाथनामाचार्यादयः संवसथं हि काञ्च्याः ।।१।।

यत्राद्युपाध्यायपदाङ्कितार्यतोलूरुगोविन्दपदार्यपूर्वाः ।।
तीर्थाभिधार्यप्रमुखाः बुधाः श्रीमध्वागमाख्यानरता अवात्सुः ।।२।।

तत्र स्थितोऽसौ यतिराडसङ्ख्यसङ्ख्यावदाशोभिसभान्तराले ।।
स्वनाथमाहात्म्यमुवाच चित्रचित्रं तदोद्भूतविमुक्तसौख्यः ।।३।।

अस्मद्गुरुश्रीगुणवर्णनाय को वा प्रभुः स्यादपि वच्मि किञ्चित् ।।
लौल्यादहं स्वामिन एव सत्यसङ्कल्पभाजो भुवि विद्वदग्र्याः ।।४।।

काश्यादियात्राविषयोऽस्मदीशैः सङ्कल्प आकारि च कालधर्मः ।।
तमाप्य कृत्वैव हरिस्तदीयवाक्याशयज्ञः समचोदयन्माम् ।।५।।

काशी गता चेन्मदनुग्रहोरुपात्रेण सत्याभिनवेन तर्हि ।।
मयापि तेनापि गता ध्रुवं स्यात् सा तेन गच्छेदयमेव काशीम् ।।६।।

इत्याशयस्तद्वचसो गुरोस्ते प्रेमास्पदत्वेन यशस्तवालम् ।।
अपेक्षमाणस्य यतस्त्वमस्माद्गच्छेति काशीं सुरसिन्धुरम्याम् ।।७।।

अथो गमिष्यामि गुरुप्रसादात्काशीमहं पुण्यतमां भुवीति ।।
सङ्कल्प्य तत्तद्विषयेषु सर्वान् बुधान् प्रभूंश्चाब्रुवमप्यशेषम् ।।८।।

कोनेरिनामार्यमुखाः समस्ता आचार्यवर्याः प्रभवस्तदा माम् ।।
न्यवारयन् वीक्ष्य हि देशकालौ यथा प्रतीतं परमादराद्याः ।।९।।

दुष्टास्तुरुष्काः प्रबलाः समस्तं संव्याप्नुवन् देशमहो समन्तात् ।।
भूदेवदेवद्विष आचरन्ति ते नश्च पीडां गलितानुकम्पाः ।।१०।।

इतोऽप्युदीच्यामधिकां हि पीडां नानाविधां सर्वजना वदन्ति ।।
दिशं गतास्तामनुभूतपीडास्तस्मान्न गन्तव्यमिति प्रभाति ।।११।।

पुरातनैर्श्रीचरणैश्च यत्ने कृतेऽपि काशी गमनं न चासीत् ।।
कृच्छ्राद्गतानामपि कृच्छ्रमासीदिति श्रुतं प्राक्तनलोकवक्त्रात् ।।१२।।

कालः कलिर्विघ्नकरो यतोऽतो विघ्ना भवेयुर्बहवोऽत्र नूनम् ।।
निवारकाः केऽपि न सन्ति तेषामितीह नो भाति न गम्यतां तत् ।।१३।।

नगम्यतां नगम्यतामिना भवत्पुरो वयम् ।।
असूक्ष्मदर्शिनोऽधिकं न भाषितुं क्षमा इति ।।१४।।

ततस्तदाकर्ण्य वचोब्रुवं तान् श्रीस्वामिनोऽभिज्ञतमा मुनीशाः ।।
अमोघसङ्कल्पकृतप्रभावरत्नाकरस्तान्न हि वेद लोकः ।।१५।।

तादृक्प्रभूणां परमप्रसादात् काशीं गमिष्यामि न संशयो मे ।।
केनाप्यवार्यप्रतिबन्धराशिं श्रीस्वामिनामस्मृतितो निवार्य ।।१६।।

Rarest Archiver

इत्थं समाधायदृढप्रतिज्ञो वाराणशीं गन्तुमना अभूवम् ।।
यदा तदाकर्ण्य समस्तलोकाः समागमन् भूवलयालया ये ।।१७।।

तदा मुदा क्रोधनहायनेऽहं कृष्णातटे संवसथे वसं स्म ।।
मरूरुसञ्ज्ञे समवाप्तकन्ये गुरौ चरन् मज्जनपूर्वकृत्यम् ।।१८।।

अहं दशम्यां विजयोपनाम्न्यां निमज्ज्य संपूज्य ससीतरामम् ।।
सङ्कल्प्य तस्याग्रत एव गन्तुं काशीं मुदा प्रस्थितवान् सशिष्यः ।।१९।।

साम्राज्यभारं विनिवेश्य सत्याधीशेयतीशे परमप्रिये मे ।।
काशीं प्रति प्रस्थितवान् यदाहं सन्तोन्वयुर्भूतलवासिनो ये ।।२०।।

कोनेर्याचार्यपूर्वा ये धूमाचार्योऽपि विश्रुतः ।।
आचार्यौ तस्य शिष्यौ च रङ्गनारायणाभिधौ ।।२१।।

आचार्यो नरसिंहाख्यः कालूरूपपदस्तथा ।।
यः केशवपदाचार्यः कन्दनोलूपनामकः ।।२२।।

पाडुंरङ्गोपनामेतकेशवाचार्यकायजः ।।
आनन्दार्यश्चकल्याणकोनेर्याचार्यकस्तथा ।।२३।।

शेषाचार्योऽपि वरदराजाचार्यतनूजनिः ।।
उमर्ज्युपपदोपेतकृष्णाचार्योऽपि विश्रुतः ।।२४।।

आचार्यो रङ्गनामा च भट्टाचार्योपनामयुक् ।।
विद्याधीशाह्वयाचार्यो यः कर्नाटकदेशगः ।।२५।।

सात्विकोपारव्यया यस्तु विश्रुतो मां तदान्वयान् ।।
आचार्यो नरसिंहाख्यः स कर्नाटकदेशकः ।।२६।।

सशिष्यस्तिम्मणाचार्यस्ताडिपत्रिकृतालयः ।।
राचूरूपपदाढ्यश्च नृसिंहाचार्यनामकः ।।२७।।

उद्गाविनरसिंहाख्यो गुण्डरामाह्वयस्तथा ।।
लक्ष्मीश्वरनृसिंहाख्यस्वामिदासः प्रियश्च मे ।।२८।।

विद्याधीशोऽपि परमप्रेमपात्रं सदा मम ।।
शेषाचार्यसुतः स्वामिदासस्तिम्मण्णसञ्ज्ञिकः ।।२९।।

नारायणोपनामेतवेङ्कटेशाह्वयश्च यः ।।
यश्च गौरनृसिंहाख्यः स्वामिदासौ च तावुभौ ।।३०।।

कौलग्युपपदोपेतजनार्दनपदश्च यः ।।
यः पद्मनाभभट्टीयधर्माचार्यश्च तावुभौ ।।३१।।

आचार्यश्रीनिवासाख्यः छलार्युपपदस्तथा ।।
गुञ्जिभट्टनृसिंहाख्याचार्यपूर्वास्तथा परे ।।३२।।

सर्वे वैराग्यभाग्यास्ते सदाचारदिसद्गुणाः ।।
मामन्वयुर्मुदा काशीयात्राकाले विवेकिनः ।।३३।।

एतदन्येऽपि बहवो वैष्णवाः सर्वराष्ट्रगाः ।।

Rarest Archiver

अश्वादिवाहनारूढास्तदा मामन्वयुर्मुदा ।।३४।।

संन्यासिनस्तदानन्दतीर्थकेशवनामकौ ।।
वासुदेवपदाधारो वेंकटेशपदाश्रयः ।।३५।।

प्रद्युम्नपदवाच्यश्च जनार्दनसमाह्वयः ।।
विष्णुनामेति चान्ये ये तेऽपि मामन्वयुस्तदा ।।३६।।

कृष्णार्चकाः श्रीचरणाश्च शिष्यैः मामन्वयुः श्रीरघुवर्यसंज्ञाः ।।
वैराग्यभाग्या वररूप्यपीठक्षेत्रालया भिक्षुवरास्तदानीम् ।।३७।।

मदीया अपि विद्वांसो मदादेशात्तदान्वयुः ।।
विमुक्ता इव सौख्याढ्या विहरन्तः स्म केचन ।।३८।।

आद्योनृसिंहनामेतो बेल्लूरूपपदस्तथा ।।
जनार्दनस्तथाकृष्णो जसवीपल्युपसञ्ज्ञकः ।।३९।।

रायिबाग्युपनामेतो जनार्दनपदस्तथा ।।
पिल्लरोपाख्यकोनेर्याचार्यजोप्पण्णनामकः ।।४०।।

तथा कोन्तोपनामेतवेङ्कटेशसमाह्वयः ।।
इक्केरिनरसिंहाख्यः श्रीनिवासाह्वयस्तथा ।।४१।।

काश्युपाख्यश्रीनिवासो गोटूरूपपदस्तथा ।।
तथा वेङ्कटपत्याख्य इत्येते विबुधा अहो ।।४२।।

धूमभट्टसुतो यश्च रघुनाथपदेरितः ।।
एतदाद्याः द्विजाः सेवां कुर्वाणा मां समन्वयुः ।।४३।।

तैरेतैः सह सद्वर्गैः परमानन्दनिर्भरः ।।
काशीं गच्छन्नगां धर्मपुरीं गोदावरीवृत्ताम् ।।४४।।

यदाथ गोदामतरं तरन्त तत्सेतुभूता इव रेजिरेऽलम् ।।
शिरोधृतग्रन्थिभरा अशेषलोका वराश्वादिकवाहनाढ्याः ।।४५।।

गोदां समुत्तीर्य नन्दीं पुरोऽहं लोकैरनेकैर्गतिवान् सहाशु ।।
क्रोशत्रिकं तत्र निवासहेतोरवातरं तद्दिवसे तटाके ।।४६।।

अवान्तरं यत्र बहिः प्रदेशे ग्रामादणोः स्वच्छतळे विशाले ।।
व्यधुर्नियोज्याः शिबिरं विशालं वासाय देवेन्द्रगृहोपमानम् ।।४७।।

आचार्यलोकाश्च विचित्रवस्त्रैः समन्ततोऽस्मच्छिबिरस्य चित्रैः ।।
चक्रुर्विशालान्निलयानमीषां श्रेण्यो विरेजुः पुरगा इवालम् ।।४८।।

वृन्दावनेऽलं रचिते तदात्वे द्वादश्यहे कार्तिकशुक्लपक्षे।।
दीपालिदीप्तेऽत्र निमज्य रात्रौ दामोदरं देवमपूजयं स्म।।४९।।

म्लेञ्छाधिपस्तद्दिन एव कश्चित् सर्वापहारेच्छुरयापयत् स्वान् ।।
आयातमाकर्ण्य महाजनौघं तग्द्रामनाथं स्ववचोऽपि तैर्हि ।।५०।।

दूताः समागत्य तदुक्तमुक्त्वा तं तेन सार्धं रुरुधुः स्म यावत् ।।

Rarest Archiver

आस्माकनाथा गमनं भवद्भिर्न गम्यतां तावदिति ब्रुवन्तः ।।५१।।
आप्योरुचिन्तामथ सत्यनाथपुरीयमत्रावसतां जनानाम् ।।
पीडा कथं प्रत्युत सौख्यमेव स्वामिप्रसादादितिवाङ्मयोचे ।।५२।।
यदा कृतं नाम हि सत्यनाथपुरीति तासां शिबिरावलीनाम् ।।
महाजनानां भगवानधीशस्वान्तालयोऽभूद्रघुपप्रसन्नः ।।५३।।
ततोऽस्मदङ्कं यवनेट् स आयान् मुमोह दृष्ट्वाध्वनि काञ्चनस्त्रीम् ।।
रम्यामुपेतां मुदितास्मदीशस्वान्तालयश्रीरमणेरणेन ।।५४।।
म्लेच्छाधिनाथोऽध्वनि पीतमद्यः तयातिवेलं रममाण एव ।।
अपेतबाह्यस्मरणः समासीत् स इत्यथाश्रावि जनैः प्रवृत्तिः ।।५५।।
तद्ग्रामपाद्यैरपि वीक्ष्य तस्यालस्यं हरिप्रेरितसाधुधीभिः ।।
चक्रे निरोधो न हि नस्तदालं कुतूहलं प्रापि मयाखिलैश्च ।।५६।।
ततोऽस्मदीशस्मरणप्रभावं बुधान् ब्रुवन् तत्स्मरणं वितन्वन् ।।
अगां पुरोहं परितः समेतो महाजनोघैरतिवेलसौख्यः ।।५७।।
वैकण्ठनिश्रेणिमिवोल्लसन्तमभ्रङ्कषैर्वेणुमुखैर्द्रुमोघैः ।।
अपेतमार्ताण्डकरावकाशैर्विभीषणं व्याघ्रमुखैर्मृगोघैः ।।५८।।
समेत्य तं सिंहपदं महीध्रमारुह्यगोदामभिवीक्षमाणः ।।
मुदा परावृत्य नमोऽचरं सज्जनोरुगोविन्दरवं विश्रृण्वन् ।।५९।।
कान्तारकान्ताद्धरणीधरेन्द्रात् ततोऽवरुह्य स्वजनैर्मुदाहम् ।।
रोम्पल्लिशब्दं गतवानतिष्ठं ग्रामं नदीरोधसि तत्र शस्ते ।।६०।।
तदा त्व एवाखिलसौख्यदात्री पुरी च मयाकारि निवासहेतोः ।।
तस्मिन् दिनेऽस्मद्प्रभुसत्यनाथपदाङ्किता स्वामिवरप्रसादात् ।।६१।।
पुर्यां समन्ताच्छिबिरस्य नोऽस्यां महाजनानां शिबिराणि रेजुः ।।
ते ते वसन् स्वीयनिवेशरत्ने भृशोपयुक्तेऽच्छतले विशाले ।।६२।।
केचिन्निवेशस्य पुरो बबन्धुर्निबन्धयामासुरथापरे स्वैः ।।
श्रमार्दितानश्ववरन् निपीतक्षीरान् महाक्षुद्रचितोरुहेषान् ।।६३।।
श्रेणीकृतास्ते तुरगा निबद्धा दृढेष्वलं शङ्कुषु पाशवर्यैः ।।
रेजुः सुलाङ्गूलमुखाङ्घ्रिकर्णोदरास्ततो जग्धगुडोरुखण्डाः ।।६४।।
निधाय सद्घासभरान् स्वमूर्ध्नि त्रिवर्णबाह्या मुदितास्तदागुः ।।
स्वभाषया घास इति ब्रुवन्तो सकृज्जनास्तान् जगृहुः क्रयात्ते ।।६५।।
आनीय मानं हरितं सुघासमालोक्य ह्रेषां महतीं चरन्तः ।।
अपीडयंश्चारुखुरोपघातैर्भुवं यदालं व्यलसंस्तदाश्वाः ।।६६।।
श्रुत्वा समायातमिमं जनौघं पुरी समागुर्वणिजोऽस्मदीयाम् ।।
आदाय सूक्ष्मोत्तमतण्डुलादीनिष्टान् मनोज्ञानखिलान् पदार्थान् ।।६७।।
तत्रापणं ते वणिजो वितेनुः सत्तण्डुलानां प्रकरं दराच्छम् ।।

Rarest Archiver

गोधूमपिष्टं चणकान् गुडादीन् प्रसारयन्तः पुरतोऽखिलार्थान् ॥६८॥

आदाय पण्यं तरसा समेत्य वणिग्भिरत्र व्यवहृत्य लोकाः ॥
क्रीतान् पदार्थान् शिबिरं समायन् समाप्लुतास्तत्र जवेन पेचुः ॥६९॥

निमज्य कोनेरिपदोदिताद्याः आचार्यवर्या विहितः स्वकृत्याः ॥
प्रशुश्रुवुः श्रीपतिमार्चयन्तः श्रीसत्यनाथाभ्युदयं पुराणम् ॥७०॥

व्याख्याय शिष्यान् वरमध्वशास्त्रं सद्वैश्वदेवादिकृतिं विधाय ॥
हर्यर्पितान्नादिपदार्थजातैरभोजयन् विप्रवरांस्ततस्ते ॥७१॥

भुक्त्वा ततस्ते सह पुत्रपूर्वैः सन्ध्यां अवन्ध्यां विरचय्य सायम् ॥
कर्माग्निहोत्रादि च संस्मरन्तो हरिं रजन्यां शिबिरेष्ववात्सुः ॥७२॥

श्रीसत्यनाथाह्वयकीर्त्यपुर्यां मुदावसं सर्वनिवेशमध्ये ॥
राजाधिराजालयसन्निभेऽहं तन्वन् स्वकृत्यं शिबिरेऽस्मदीये ॥७३॥

एतत्पुरीवासिमहाजनानां कुलोकभीतेरवनाय रात्रौ ॥
एकेन भाव्यं कुशलेन पुंसा वशेस्य देयाः पुरुषाः शतञ्च ॥७४॥

इत्थं विचार्याहमदां प्रभुत्वं द्विजाय तस्मै जनतावनाय ॥
तल्लक्षणं तत्कटिबन्धवस्त्रं चोष्णीषकं वर्म तथा प्रदीपम् ॥७५॥

माण्डोगणीति ह्युपनाम यस्य विद्वान् युवा कार्यकृतौ प्रभुर्यः ॥
समस्तभाषानिपुणस्तथा यो यो व्यासराजाह्वयविश्रुतश्च ॥७६॥

स व्यासराजः परितः पुरीं तां दीपेन युक्तः शत किङ्करैश्च ॥
वीतप्रमादैः खरहेतिभीष्मैः भ्रमन् प्रजागर्ति पुरानिशायाम् ॥७७॥

सूष्णीषवर्मासिधरः सदृश्यः श्राव्याणि गीतानि मदीश्वराणाम् ॥
अगापयत्सुस्वनगायकाभ्यां संसेवितो भृत्यजनैस्तदालम् ॥७८॥

भृत्यास्तदाज्ञां शिरसा वहन्तो वादित्रयन्त्रादिरवं चरन्तः ॥
द्विड्भीषणं बभ्रमुराप्रभातं पुर्याः समन्तात्खलु जाग्रतोऽस्याः ॥७९॥

तत्सङ्गनेत्रा पुरिरक्षितायां तस्यां स सुष्वापमहाजनौघः॥
निर्भीतिसौख्येन गृहेष्विवालं यावत् प्रभातं शिबिरेषु रात्रौ॥८०॥

अश्रान्तमेवं नगरीविधानं तदात्व एवास्मदिनप्रसादात् ॥
सुखेन वासो मम तत्र सर्वैः किं वर्णनीयोस्मदिनप्रभावः ॥८१॥

उषस्यथोत्थाय हरिं रमेशं स्मरन् गुरूंस्तीर्थतदीश्वरांश्च ॥
विधाय शौचाद्यवगाहपूर्वं स्वामिप्रसादादचरं यदाहम् ॥८२॥

हृद्यैस्तदा भागवतस्थपद्यैः सन्तः समुत्थाय हरिं स्मरन्तः ॥
भव्यैश्च तेऽन्यैर्नुनुवुस्स्म नव्यैर्भक्ताङ्गरोमोद्गमकृत्स्वनं तम् ॥८३॥

गीतानि विष्णोर्मधुराण्यगायन्नुच्चैर्गुरूणामपि पुण्यदानि ॥
श्रीसत्यनाथाभ्युदयञ्च पेठुः श्राव्यस्वनास्तत्र पुरे तु केचित् ॥८४॥

Rarest Archiver

तादृग्जनैरारचितप्रभातकृत्यैः पुरोऽहं कृतवान् प्रयाणम् ॥
महानुभावाधिपपादपद्मानिशं स्मृतिक्षिप्तमहान्तरायः ॥८५॥

काशीप्रयाणवेलायामेवमेव महोत्सवः ॥
अनिशं स्वामिचरणस्मरणोरुबलेन नः ॥८६॥

इत्यस्मिन् कथयति सत्यनाथनाथमाहात्म्यं प्रगुणवरे महादरेण ॥
आकर्ण्य श्रवणसुधायमानमार्या जन्माद्यार्थवदिति वाचमूचिरेऽलम् ॥८७॥

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ॥
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तद्गुणसारलुब्धकविभिः सर्गोऽभवत्सप्तमः ॥८८॥

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे सप्तमः सर्गः

Rarest Archiver

।। अष्टमः सर्गः।।

पुनर्वाणीमभाणीत् स प्रवणांस्तान् विचक्षणान् ।।
सद्गुणः करुणापूर्णो निपुणो गुरुवर्णने ।।१।।

प्रणितां प्रणताभीष्टप्रदां शैवलिनीं ततः ।।
नर्मदां शर्मदां तीर्त्वा शर्मणाशु पुरोगमम् ।।२।।

वननीयां धुनीं लोकैर्यमुनां नीलजीवनाम् ।।
इनजातामथेत्यासं धन्यो भुवनपावनीम् ।।३।।

प्रयागफलदं स्मृत्वा प्रयागं प्रविशं ततः ।।
तीर्थराजं महाक्षेत्रं तैषाच्छहरिवासरे ।।४।।

प्रत्यूहनिवहं भित्वा प्राप्याधीशतपोबलात् ।।
प्रयागं यमयां मोदं नासीत्तस्यावधिर्बुधाः ।।५।।

गङ्गां तरङ्गिणीतुङ्गां त्वङ्गत्तुङ्गतरङ्गकाम् ।।
मङ्गलां हरिपत्सङ्गां गङ्गाधरशिरोमणिम् ।।६।।

आलोक्य परमानन्दसञ्जाताङ्गरुहस्तदा।।
साष्टाङ्गमनमं वीतबाह्यस्मृतिरहं बुधाः।।७।।

विष्णुपद्यां महानद्यां गभीरायामहं ततः।।
निमज्यापूज्य देवेशमासमानन्दतुन्दिलः।।८।।

तत्र स्वाम्युपकाराब्धिमद्भुतं रोमहर्षणम् ।।
स्मारं स्मारं निमग्नोऽहं परमाश्चर्यवारिधौ ।।९।।

नाथोपकृत्यनुस्मृत्या भुवनाभिनवा तदा ।।
सत्यनाथपुरी जज्ञे प्रयागे जाह्नवी तटे ।।१०।।

कोनेर्याचार्यपूर्वाणां मन्दिराणि समन्ततः ।।
विमलानि विशालानि विरेजुस्तत्र पुर्यलम् ।।११।।

भवनं भुवनाश्चर्यं देवेन्द्रभवनोपमम् ।।
स्वामिराजप्रसादान्मे बभौ तद्भवनान्तरे ।।१२।।

प्रयागं प्राविशं यस्मिन्नह्नितस्मात्तृतीयके ।।
अह्न्यागान्मकरं राशिं पुण्यराशिप्रदं रविः ।।१३।।

पुरा युधिष्ठिरो राजा भीमाद्यैरनुजैः सह ।।
तीर्थयात्राप्रसङ्गेन तीर्थराजं समागमत् ।।१४।।

कुन्तीपुत्रोऽह्नि यस्मिन् स प्रयागं प्राविशत्ततः ।।
तृतीयेऽह्नि समायातो मकरं भास्करस्तदा ।।१५।।

विमले जाह्नवीतीरे विशाले स युधिष्ठिरः ।।
गृहाणि रम्यहर्म्याणि कारुभिः समकारयत् ।।१६।।

विचित्रेष्वेषु चित्रेषु पाण्डवाः सुमुनीश्वराः ।।

Rarest Archiver

अवसन् स्नानदानादिधर्मलोलां महामुदा ।।१७।।

इति श्रुतं पुराणे यत् तद्वत्सर्वमभूदहो ।।
तदाधीशप्रसादेन तद्वर्ण्याः केन ते बुधाः ।।१८।।

स्नाने दाने जपे मध्वशास्त्रप्रवचनादिषु ।।
यावन्मनोरथो देवविप्रगङ्गासमर्चने ।।१९।।

ततोऽधिकमशेषं तत्तत्र कृत्यमजायत ।।
तपोरत्नकराधीशपूर्णकारुण्यतो मम ।।२०।।

सत्यनाथपुरीस्थानां वैकुण्ठावासिनामिव ।।
कोनेर्याचार्यपूर्वाणां तत्र सौख्यमभूत् खलु ।।२१।।

त्रिवेण्यां मुक्तिकारिण्यां सज्जनैर्मज्जनादिकम् ।।
कुर्वन् मुदावसं तत्रासितफाल्गुनषष्ठ्यहम् ।।२२।।

ततो वाराणसीं गन्तुं पुण्यक्षेत्रं सहाखिलैः ।।
सत्यनाथपुरीवासैः पुरोऽगां सप्तमीदिने ।।२३।।

मया काशीपथे यत्र त्रयोदश्यामवस्थितम् ।।
तत्र रात्रौ मदभ्याशमायाम्लेच्छो हि कश्चन ।।२४।।

परोछ्रयासहानां दुर्जनानां सूचनादलम् ।।
प्रयागे यवनाधीशभ्याश एव प्रथाजनि ।।२५।।

एतत्सङ्घप्रणेतास्ति दण्डी कश्चन भाग्यवान् ।।
यतो लोका नमन्तीमं सर्वेऽप्याज्ञा धरा इति ।।२६।।

तयैव प्रथयास्माकं शिबिरान्तः समेत्य सः ।।
मत्तो वित्तस्य लाभाय खलो मामब्रवीदिति ।।२७।।

एतत्परिषदो नेता त्वं रहस्यसि गूहितः ।।
द्रव्यमस्ति तवाभ्याशे प्रचुरं दीयतां त्वया ।।२८।।

स्वभाषया बभाषेऽसौ भीष्ममित्यादिभाषितम् ।।
यदा तदा दरेतोऽपि द्विरिमं श्लोकमापठम् ।।२९।।

समाश्रयेद्गुरुं भक्त्या महाविश्वासपूर्वकम् ।।
निक्षिपेत् सर्वभारांश्च गुरोः श्रीपादपङ्कजे ।।३०।।

ततस्तस्मै फलं प्रादां यवनायागताय सः ।।
तच्छ्लोकपाठमाहात्म्यादहो तूर्ष्णीं बहिर्ययौ ।।३१।।

तद्देशप्रभुणाज्ञप्ताः पदवीपरिरक्षकाः।।
सङ्घचाय लोकानायातांस्तेभ्यो गृह्णन्ति ये वसु ।।३२।।

बहिरागतमालोक्य तदा तं यवनं खलम् ।
जघ्नुस्ते चरणत्राणैर्ज्ञात्वा तद्व्यापृतिं बुधाः ।।३३।।

एभ्योऽर्थलाभो नासीन्नस्तानुद्वेजयितुं कुतः ।।
समागतोऽसि चोर त्वमिति ते भर्त्सयंश्च तम् ।।३४।।

Rarest Archiver

अहो श्रीस्वामिमाहात्म्यं यत्तच्छ्लोकोक्तिमात्रतः ।।
योऽनिष्टं कर्तुमायान्मे सोऽनिष्टं प्राप तत्क्षणात् ।।३५।।

गतः परिषदाहं चेत् प्रत्यहं प्रतिवर्त्म च ।।
वसुग्रहे नियुक्तानां देशाधिपतिना नृणाम् ।।३६।।

पीडाभिर्मे विलम्बः स्यात् काशीं गन्तुं ध्रुवं ततः ।।
लोकपालिमिमां त्यक्त्वा गन्तव्यं पञ्चषैः सह ।।३७।।

गन्तव्यं भिक्षुकाकृत्या जाह्नवीतीरवर्त्मना।।
अस्फुटं सततं गङ्गावगाहो मे भविष्यति।।३८।।

इत्थमालोच्य या मेऽन्त्ये रात्र्याः बहिरयापयम् ।।
नियोज्यान् रघुनाथादीन् वासोयुगलधारिणः ।।३९।।

यदि सम्भूय यास्यामः प्रबुद्धाः प्रभुकिङ्कराः ।।
निरोधकाः समस्तान्नः पीडयिष्यन्ति निर्दयाः ।।४०।।

इत्थं निश्चित्य मौनाढ्या मन्नियोज्याः पृथक् पृथक्।।
सङ्घाद्बहिर्विनिर्याताः मलाद्युत्सर्जका इव।।४१।।

राजवत्प्रविशेद्ग्रामं चोरवन्निसरेद्बहिः ।।
इति प्रमाणसिद्धो यः स धर्मो मे समागतः ।।४२।।

इति तुष्यन्नहं त्यक्तवाहनादिर्बहिर्जनात् ।।
निर्गत्य तैः पुरो यातैः सङ्गत्यागां पुरो बुधाः ।।४३।।

लक्ष्मीश्वरनृसिंहाश्च तथालङ्कारमाधवः ।।
रघुनाथस्तथा काशीनिवासो माधवस्तथा ।।४४।।

गोटूरुपपदोपेतश्रीनिवासाह्वयावुभौ ।।
महाजनोपनामेतरस्तथा तिमण्णसञ्ज्ञकः ।।४५।।

आनदश्च गयाक्षेत्रविष्णुपादोपजीवकः ।।
इत्येते मां तदा शिष्याः सेवमानाः समन्वयुः ।।४६।।

त्यक्तपात्रादिकस्वार्थैः तैः समेतः पुरो बुधाः ।।
गच्छन् भानूदयात्पश्चात् जाह्नवीतीरमाप्तवान् ।।४७।।

कर्णधारास्तदा नावं सुरसिन्धुजलान्तरे ।।
नयन्तो मां समालोक्य परावृत्ता बभूविरे ।।४८।।

स्वामिराजप्रसादान्नो नाविका नावमन्तिकम् ।।
परावृत्या नयंस्तो ये बहूदूरं गता अपि ।।४९।।

आरोहयन् यदा नावं नाविकानस्तदा ब्रवीत् ।।
तीरस्थः कश्चिदागत्य भर्त्सयन्निति तांस्तदा ।।५०।।

एते प्रायो नु परिषद्गता एवागता इह ।।
वञ्चयन्तो पथे नातो नारोहयत तानहो ।।५१।।

इत्यादिवचनं तस्य श्रुत्वा कश्चनमस्करी ।।

Rarest Archiver

अद्वैती तीरगोऽवादीदिति वाचमहो बुधाः ।।५२।।

अयं भिक्षुः किमस्यस्मिन्नेते निस्वाः प्रयात्परे ।।
विन्ध्यवासी पदं क्षेत्रं परतीरगतं ध्रुवम् ।।५३।।

इति तद्वचनं श्रुत्वा तीरस्थैः प्रभुकिङ्करैः ।।
तस्मिन् तूर्ष्णीं स्थिते गङ्गामतरं सत्वरं निजैः ।।५४।।

ततो नवैर्मृण्मयपात्रवृन्दैर्देवार्चनाद्यं विदधत् स्वकृत्यम् ।।
भागीरथीतीरगवर्त्मनैव वाराणसीपार्श्वमगां मुदाहम् ।।५५।।

सत्यं तदासीद्धि विपुरावधूतश्चराम्यहं काविति यन्मदीशैः ।।
उक्तं प्रशस्ते सुरसिन्धुतीर इति प्रमोदोऽजनि मे तदालम् ।।५६।।

नाथोर्वनुग्रहबलेन ततः क्षयाख्यसंवत्सरप्रतिपदि प्रमदेन काशीम् ।।
मध्याह्न आविशमहं सुरसिन्धुशस्तां श्रीबिन्दुमाधवसतीपतिपूर्वदेवाम् ।।५७।।

पार्वत्या च महेशानः शच्या चेन्द्रस्तथा सुराः ।।
मज्जनाय समायान्ति मद्याह्ने मणिकर्णिकाम् ।।५८।।

इति स्मृत्युक्तमाहात्म्यातिशयां मणिकर्णिकाम् ।।
तदैवाचिरमेत्याहं व्यधामाप्लवनादिकम् ।।५९।।

इत्यृताभिनवाख्येन्दोर्गोभिः साधुसरोवरे ।।
मनः कुमुदवृन्दानि बभूवुर्नन्दितान्यलम् ।।६०।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तद्गुणसारलुब्धकविभिः सर्गो बभूवाष्टमः ।।६१।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे अष्टमः सर्गः

Rarest Archiver

||नवमः सर्गः||

भूयो बुधान् तान् यतिनाथसत्यनाथेन्द्रमाहात्म्यसमुल्लसन्तीम् ||
उवाच वाचं स तपस्विराजः प्रवृद्धनाथादरसिन्धुराजः ||१||

काश्यामहो तत्र महीसुराणामुपद्रवो म्लेच्छनिमित्तको यः ||
स केन वाच्योऽप्यधिपप्रसादादभूतपूर्वां मुदमन्वभूवम् ||२||

यो राघवेन्द्राह्वयकः समासत् काश्यां तदा कोङ्कणदेशजातः ||
स मस्करीमागतवान् प्रयागे गतं समाकर्ण्य महादरेण ||३||

आभाष्य मां तत्र स राघवेन्द्रः प्रोचे वचः साम्प्रतमत्र काश्याम् ||
द्विषामलं निर्जरभूसुराणां म्लेच्छप्रजानां महतीह पीडा ||४||

विश्वेश्वराद्यालयराजिरत्र विनाशिता तैरिति नित्ययात्रा ||
तद्गोचरा नास्ति सुरापगायाः स्नानेऽपि सौख्यं न हि पीडयैषाम् ||५||

निमज्य तस्यामुपविश्य कुर्युस्तत्रैव निर्माल्यविसर्जनं चेत् ||
द्विजान् स्पृशन्तः सुरसम्पुटाद्यं नद्यां क्षिपन्तः प्रहरन्ति पद्भ्याम् ||६||

तद्दुष्टभीत्या त्वरयावगाहमात्रं विधायामरनिम्नगायाम् ||
समेत्य सद्मान्यमरार्चनाद्यं कुर्वन्ति कृत्यं क्षितिनिर्जरास्तत् ||७||

तत्रापि घण्टानिनदं चरन्ति ते म्लेच्छभीत्या खलु मन्दमन्दम् ||
स्वाध्यायपाठं च तथागमानां व्याख्याङ्कपाठं भयतः पिधाय ||८||

इत्यादिपीडा महतीह काश्यां त्यक्तोरुसंस्थानसमस्तचिह्नाः ||
ध्रुवं भवन्तोऽपि तता जगत्यामाच्छादनीया न हि कीर्तिरिच्छा ||९||

जीमूतसञ्छादितहंसबिम्बमिव स्वरूपं भवतां प्रबोद्धुम् ||
न शक्यते केन ततो न वासो भवादृशानां सुगमोऽत्र काश्याम् ||१०||

तथाऽपि योगोऽत्र विचारितोऽलं राजन्यराजः शुभशीलशाली ||
तत्राऽस्ति काश्यां बहुभाग्यशाली तत्संस्तवोलं मम विद्यते हो ||११||

तन्मन्दिरं सुन्दरमस्ति तत्र विशङ्कटं चारुविशालशालम् ||
पुरोपमानं बहुलाभ्रचुम्बिः प्रासादरम्यं स्फटिकाभकुड्यम् ||१२||

अन्तस्थितानेकभृशोपयुक्ताण्वागारमत्युन्नतसत्कपाटम् ||
विपक्षदुर्गं सुरसेव्यगङ्गातरङ्गभङ्गप्रदतीरवर्त्ति ||१३||

तत्र प्रवेशे भवतां न कापि पीडा भवेच्चाश्रमयोग्यकृत्यम् ||
स्वैरं द्युनद्याप्लवदेवपूजाव्याख्यानपृथ्वीबुधतर्पणाद्यम् ||१४||

काशीप्रवेशो भवतां यदा स्यादभ्येत्य पादौ बहुमानपूर्वम् ||
तत्क्षत्रियेणाखिलवैभवेन प्रवेशयिष्यामि तदीयवेश्म ||१५||

उक्त्वेति काशीं गतवान् स भिक्षुर्दक्षः कृतौ क्षत्रियपालकेन ||
प्रत्यैक्षतामामलबुद्धिभाजा नन्वाश्रवेणादरशालिना माम् ||१६||

प्रविश्य काशीं मणिकर्णिकां तां समेत्य तत्राप्लवनं यदाहम् ||

Rarest Archiver

व्यधां प्रविव्राड्बहुवैभवेन सोऽभ्यागमत् क्षत्रियपेण तेन ।।१७।।
स वैभवोऽभ्येत्य यदा नमन् मां राजन्यराजो निजकिङ्करैः सः ।।
भक्त्यायुतो विस्मयवारिराशौ स्वैरं विहारं व्यचरत् तदा हृत् ।।१८।।
यदानयन् मञ्जुलराजमन्दिरं मां क्षत्रियोऽश्रीपदलक्ष्मणस्तदा ।।
सुमङ्गलारार्तिकमाचरन् स्त्रियो दोर्दण्डमृत्कुण्डयुजोऽपि मेऽद्भुतम् ।।१९।।
यदेन्दिरामन्दिरराजमन्दिरं तत्प्राविशं पूर्णमहेननिस्तुलम् ।।
वैकुण्ठमेवाविशमित्यहं तदा व्याज्ञासिषं तादृगवेक्ष्य मन्दिरम् ।।२०।।
यो विश्रुतो व्यासनृसिंहनामाचार्यस्तदादान् मम पुस्तकं सः ।।
श्रीमन्महाभागवतस्य दिव्यं श्रीमध्वशास्त्रस्य च भारतस्य ।।२१।।
तस्मिन् दिने तादृशसद्म लब्ध्वा सरस्वतीमन्दिरपुस्तकालिम् ।।
वीतोपमां चाहमयां मुदं यां तस्याश्च नासीदवधिर्बतार्याः ।।२२।।
तन्मन्दिरं सुन्दरसुन्दरेऽहं वसन् समुत्थाय तुरीययामे ।।
शौचादिकृत्यं विदधत्क्षपायां गङ्गावगाहाद्यचरं स्वकृत्यम् ।।२३।।
अज्ञात एवान्यजनैः तदाहं सुरापगायामवगाह्य जप्त्वा ।।
स्वैरं समागां सततं निकाय्यं मार्ताण्डबिम्बोदयतः पुराज्ञाः ।।२४।।
जप्त्वा पुनस्तत्र गृहे पुराणं शृण्वन् सुकाशीमहिमाद्युपेतम् ।।
श्रीमध्वशास्त्रं सृतिमुक्तिदायि प्रीत्यै हरेर्व्याकरवं मुदाहम् ।।२५।।
अश्रावकोऽथो मणिकर्णिकां तां दूरे पुरोगं स्वमवेक्षमाणः ।।
मदाज्ञयैकं समवाप्य तत्र मध्याह्नकाले व्यचरं वगाहम् ।।२६।।
अज्ञात एवान्यजनैः समेत्य तन्मन्दिरं चित्रविचित्रपुष्पैः ।।
सन्मल्लिकाद्यैर्विविधैः फलाद्यैः धूपैश्च दीपैरचरं सुरार्चाम् ।।२७।।
तपोऽब्धिनाथोरुदयाप्रभावात् मनोरथः स्वाश्रमयोग्यकृत्ये ।।
यावांस्तदासीदधिकं ततोऽपि काश्यां महापुण्यपदोत्तमायाम् ।।२८।।
चित्रैर्विचित्रैरपि पुष्पमाल्यै रम्यैः पवित्रैः सततं रजन्याम् ।।
यो मण्टपः श्रीहरये समासीत् तथा न कुत्रापि न संशयोऽत्र ।।२९।।
भेरीशृङ्गमृदङ्गतुर्यपटहाद्ये वादकैर्वादिते
वादित्रेऽतिविशालमण्टपवरे चक्रेऽभिषेको महान् ।।
नानापुष्पफलार्पणं विदधता काश्यां सुपञ्चामृतैः
श्रीरामस्य मया मुदा पठति तत्सूक्तानि विप्रोत्करे ।।३०।।
अग्रोल्लसत्पुष्पफलावलीतरम्भात्मकस्तम्भविराजमानम् ।।
विलम्बिरम्भाफलनारिकेलजम्बीरवृन्दोल्लसदूर्ध्वभागम् ।।३१।।
द्वारैश्चतुर्भिर्मधुरेक्षुदण्डैः समण्डितं बद्धसुपुष्पगुच्छैः ।।
विशालशालान्तरगं विशालं महाभिषेकायकृतं यदासीत् ।।३२।।
तन्मण्टपे सुन्दरसुन्दरे हो चैत्रेनवम्यां सितपक्षगायाम् ।।
योरामदेवस्य महाभिषेकः सोऽभूतपूर्वोऽजनि तत्र काश्याम् ।।३३।।

Rarest Archiver

महाभिषेकाय समार्जिता या सुश्वेतगङ्गागतशर्कराभा ।।
तां शर्करां राजतपर्वताभां को वा कविर्वर्णयितुं प्रभुः स्यात् ।।३४।।

क्षीराण्यपाराणि तदा दधीनि प्राज्यनि चाज्यानि सुगन्धभाञ्जि ।।
गव्यानि दिव्यानि मधूनि यानि काश्यां स्वदेशादधिकान्यभूवन् ।।३५।।

सत्केतकीचम्पकमल्लिकादिप्रसूनराशिश्च तदा समासीत् ।।
माल्यानि तेषां बहुलानि रम्याण्यासन् तथा श्रीतुलसीदलानि ।।३६।।

इत्याद्यभीष्टानि न केवलं मेऽधीशाङ्घ्रिकञ्जस्मरणेन नूनम् ।।
अनिष्टपुञ्जस्य निवृत्तिरासीदपि त्ववार्यस्य च तत्र काश्याम् ।।३७।।

आसीत्खलः कश्चन सत्यनाथपुर्यां द्विजः प्राक् बहुधाधिपत्यम् ।।
चकार काशीगतिमञ्जनस्य योऽस्याः पुरोऽपि प्रभुतां स ऐछत् ।।३८।।

खलाय तस्मै न मया प्रदत्तं प्रयाचमानाय तदाधिपत्यम् ।।
ततः खलोऽलब्धमनोरथोऽतिरूषाभवत् स ज्वलनेन तुल्यः ।।३९।।

कोनेरिनामार्यमुखान् द्विजाग्र्यान् भीतिं नयन्नित्यवदत् कदाचित् ।।
नेतृत्वमेतस्य महाजनस्य मह्यं प्रदाय प्रति पूरूषं च ।।४०।।

एकैकमुद्रारजतात्मकोर्वी प्रदीयतां ते यतयो वशाश्च ।।
मम क्रियं तां यदि भव्यवाञ्छा न चेदनर्थं प्रकरोमि सत्यम् ।।४१।।

तान् भीषयित्वा मम पार्श्वमायात् खलस्ततस्तद्वचितं मदीयैः ।।
जानन् जनैः क्षत्रियराजभृत्यैः निष्कासिन्तं तं व्यचरन् तदाहम् ।।४२।।

द्विजस्ततो लब्धमनोरथोऽतिरोषग्रहाविष्टमनाः सतूर्णम् ।।
समेत्य काशीशतुरूष्कराजं संसूचयामास तदातिदुष्टः ।।४३।।

द्विजाधिराजोऽत्र समागतोऽस्तीश्वरो यतीनां बहुभाग्यशाली ।।
तन्निग्रहे हो गुरुरौप्यमुद्रायुतस्य लब्धिर्भविता ध्रुवं वः ।।४४।।

इतीरितं तेन वचो निशम्य सोऽर्थातुरो म्लेच्छपतिस्तदर्थम् ।।
स्वकिङ्करान्मां समयापयत्ते मया स्थितं यत्र समागुराशु ।।४५।।

ते द्वास्थितैः क्षत्रियराजभृत्यैः निवारिताः प्रोचुरिहास्ति दण्डी ।।
यत्सङ्घनेता समहानधीनः तद्रव्यहेतोः क्रियतां भवद्भिः ।।४६।।

ततोऽब्रुवन् क्षत्रियराजभृत्या अहो न चायं जनसङ्घनेता ।।
को वाऽस्ति भिक्षोश्च जनस्य योगः सङ्घप्रणेता पर एव तस्मात् ।।४७।।

इतीरितास्तैर्यवनेशदूता सङ्घप्रणेता ध्रुवमेव भिक्षुः ।।
धनीति निश्चित्य वयं नियुक्ताः नैव त्यजामो यतिमित्यवोचन् ।।४८।।

ते क्षत्रियाज्ञां शिरसा वहन्तः शस्त्रोल्लसत्पाणितला वचो नः ।।
श्रुत्वा गृहं यात न चेद्वयं वो हन्मः समस्तानिति वाचमूचुः ।।४९।।

कालं कियन्तं परिपालितः स्यादयं भवद्भिः प्रतरेद्यते माम् ।।
गङ्गां गयां गन्तुमनास्तदानीमसावधीनो न भवेत् कथं नः ।।५०।।

Rarest Archiver

अस्मद्वशा नौः सकलापि यस्मात् तदैव कार्यं सकलं भवेन्नः ॥
उक्त्वेत्यथो तद्यवनस्य पार्श्वं ते राजदूताः प्रययुः स्म तूष्णीम् ॥५१॥

काशीं समुद्दिश्य समागतो यो महाजनस्तस्य पतिर्यतीशः ॥
यद्वैष्णवस्येष ततोऽस्ति कार्यमेतन्मुखेनाखिलमत्रनूनम् ॥५२॥

द्रव्यं यदा देयमितो जनान्नः पृथक् पृथक् चेत् सुलभं न तत् स्यात् ॥
एतन्मुखेनैव कृते तु यत्ने सौख्येन लब्धं द्रविणं भवेन्नु ॥५३॥

इत्थं समालोच्य सदोपविष्टा अशीतिसङ्ख्या अभवंस्तथाहो ॥
द्वारेऽस्मदीये जनपीडका ये गङ्गातनूजा इति विश्रुतास्ते ॥५४॥

स राघवेन्द्रो यतिरब्रवीन्मां तदेति पीडा महती प्रसक्ता ॥
उल्लङ्घनं दुर्गममापदोऽस्या ममेति भात्यत्र न संशयोऽस्ति ॥५५॥

अतो वचो मे श्रुणुतैकमेतदज्ञातमेवान्यजनैः क्षपायाम् ॥
यत्राणुनौर्मीनपरिग्रहार्था तत्राशु गन्तव्यमिना भवद्भिः ॥५६॥

तत्कर्णधारैः समयः कृतो यत्ते तारयिष्यन्ति ततः सहैत्य ॥
तैः सङ्गतिं वो विरचय्य युष्मान् नौस्थान् करिष्याम्यहमेव नूनम् ॥५७॥

श्रुत्वेति तत्प्रोक्तमहं नवम्यां चैत्रे सितायां कृतवान् प्रयाणम् ॥
सर्वं परित्यज्य तदैव रात्रौ तद्राघवेन्द्रोक्तदिशा जवेन ॥५८॥

गाङ्गेयपीडापरिहारकामः तैरावृतं द्वारमहं विसृज्य ॥
गृहोर्ध्वमारुह्य ततोऽवरूह्य गतो महाद्वारत एव तूर्णम् ॥५९॥

तदालये नित्यमिव स्थितं मां मत्वा तदा तत्र गतानपृच्छन् ॥
गङ्गात्मजाः साम्प्रतमेतदन्तस्तपस्विनः किं विचरन्ति तेऽहो ॥६०॥

इतीरितास्तत्र गतास्तदोचुः समाप्य कृत्यं विहितं समस्तम् ॥
स्वपन्ति नूनं यतयोऽधुनामी श्रमार्दिताः पश्यत यूयमेव ॥६१॥

इत्युक्तमाकर्ण्य मदीयशय्यां शयानयुक्तामिव कारितां ते ॥
स्तम्भोल्लसद्दीपमवेक्ष्य तत्र व्यज्ञासिषुर्मां शयितं तदाहो ॥६२॥

प्रदोष एवामुखवीक्षणेऽहं प्रलोभ्य तान् कैश्चिदमाशु शिष्यैः ॥
सराघवेन्द्रः पृथुतोरणेन निर्यान् पुरोगामपरैरबुद्धः ॥६३॥

प्रगृह्य वित्तं पुरतो दिशन्ति ये वर्त्म गन्तुं जनतः समस्तात् ॥
पप्रच्छ नस्तत्र विलोक्य कश्चिद्यूयं क इत्यादि तदा पदव्याम् ॥६४॥

वयं मनुष्या इति राघवेन्द्रान्तेवासिनोक्तः समभूत् स तूष्णीम् ॥
तपोनिधिस्वामिवरप्रसादादहो बुधाश्चित्रमभूत्तदानीम् ॥६५॥

सुरापगाया वरुणाख्यनद्या यः सङ्गमस्तं गतवांस्ततोऽहम् ॥
द्रोण्यामतिष्ठं विदधत्प्रतीक्षां तत्तारकाणां घटिकाश्चतस्रः ॥६६॥

अथैत्य ते नो निकटं स्वनावमारोह्य गाङ्गौघपथेन दूरम् ॥
नीत्वाभयेऽस्मान्नवतारयन्ति पुरा प्रदेशे समयेन तेन ॥६७॥

Rarest Archiver

त्यक्त्वा गयामार्गमधःप्रदेशं काश्या गतो योजनयुग्ममानम् ।।
ततो दशम्यां समवाप्य कञ्चिद्ग्रामं व्यधां श्रीहरिपूजनादि ।।६८।।

तत्रापि रात्रौ कृतवान् प्रयाणं ज्ञात्वा खलालोचितकार्यमाशु ।।
अयां गयाक्षेत्रपथानुसारात् पुरःप्रदेशान् कतिचिद्दिनानि ।।६९।।

पुरावधूतप्रचरामि काविंत्युक्तं यदार्यैस्तदृतं तदासीत् ।।
विनिस्सरेच्चोर इवेति वाक्यप्रोक्तोऽपि मुख्यो यतिधर्म आसीत् ।।७०।।

इति गदति यतीशे पूर्णगुर्वादरेऽस्मिन्
शमलशमनकाशीक्षेत्रयात्राप्रसङ्गम् ।।
उरुगुरुमहिमेतं सज्जनास्तं निशम्य
नुनुवुरसुमवाप्तानन्दसान्द्रा महान्तम् ।।७१।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽभून्नवमस्तदीयगुणविद्वर्यैर्विलाल्ये क्षितौ ।।७२।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे नवमः सर्गः

Rarest Archiver

||दशमः सर्गः||

ततः प्रवृत्तं समुवाच साधून् श्रोतॄन् महाभक्तियुतान् यतीशः ||
दयावशोऽथो गुरुराट्प्रभावप्रकाशकं सौख्यकरं प्रमेयम् ||१||

गन्तुं गयां विप्रगणान् विसृज्य श्रीसत्यनाथाख्यपुरीनिवासान् ||
सहागतान् मे न च रोचतेऽद्य ते सन्ति काश्यामधुना वियुक्ताः ||२||

समाप्य काश्यां विहितं स्वकृत्यं ततो विनिर्गत्य यदा गयां ते ||
गताः प्रवेक्ष्यन्ति ततः परस्तादहं विशेयं तदिदं ममेष्टम् ||३||

समाप्लवस्तावदमर्त्यनद्यां कार्यो महापुण्यकरोघहारी ||
वैशाखमासोऽपि समागतोऽस्ति मासोत्तमो माधवतोषहेतुः ||४||

अहं विचार्येति पुरीमगां तां या पट्टणाख्या सुरनिम्नगेता ||
अभीप्सिताब्धिः स्वमरावतीवत्त्यक्त्वा गयावर्त्म ततो बुधाग्र्याः ||५||

या चैत्रगा कृष्णचतुर्दशीतामारभ्यतावद्ध्रचरं पदव्याम् ||
तिथिस्तृतीयाक्षयनामिका या स्नानं नदे शोणपदे प्रशस्ते ||६||

लक्ष्मीश्वरोपाख्यनृसिंहनाम्ना द्विजेन चालङ्कृतिमाधवेन ||
ज्ञश्रीनिवासेन तथापरश्रीनिवासनाम्नापि मदीयकेन ||७||

तिम्मण्णनाम्नापि गयालयेनानन्दाह्वयेनापि युतः समस्तम् ||
कृत्यं चरन् मृण्मयपात्रवृन्दैर्गत्वाविशं पट्टणराजधानीम्||८||

तिथिस्तृतीयाक्षयनामिका या प्रविश्य तस्यामुरुराजधानीम् ||
तां जाह्नवीवीचिमरुत्सुपूतां व्यधां निवासं कतिचिद्दिनानि ||९||

तद्व्यासराजीयमठावलम्बि यो वेङ्कटेशाह्वयको बभूव ||
तद्राजधान्यामवसं स्म तस्याचार्यस्य गेहे विमलेऽनुकूले||१०||

मां ज्ञातुकामः परिपृच्छति स्माचार्यस्तदासौ क इमे यतीशाः ||
इत्यस्मदीयान् वदति स्म तत्रानन्दो गयाविष्णुपदोपजीवः ||११||

एते यतीशा नरसिंहसंज्ञाः श्रीसत्यपूर्वाभिनवाख्यतीर्थैः ||
सहैव शास्त्राध्ययनाश्च सत्यनाथेन्द्रशिष्यास्तदतिप्रिया हि ||१२||

श्रीमुष्णवासा अगमन्मरूरुग्रामं यतीशा इम आशु शिष्यैः ||
निशम्य सत्याभिनवीनतीर्थान् काशीप्रयाणोद्यतचेतसस्तान् ||१३||

तत्पाणिपङ्केरूहजातसत्याधीशास्तदैनानवदन् यतीशान् ||
काशीं गता अस्मदिना दिनानि बहून्यभूवन्नृतमेतदुक्तम् ||१४||

तत्सङ्गतिर्वो न भवेदितो यत् श्रीमज्जगन्नाथपथेन यूयम् ||
गयां प्रयाताशु ततश्च तेषां सङ्गो भवेन्नूनमहो यतीशाः ||१५||

स्नानं प्रयागे भवतां भविष्यन्माघे भवेन्नैव भवेदिहाब्दे ||
इतीरितास्ते त्वरया समायन्नमी जगन्नाथपथेन हंसाः ||१६||

अज्ञातवेषं वसतो ह्रदो म इतीरितस्तेन तथेति जानन् ||

Rarest Archiver

स वेङ्कटेशाह्वयको द्विजाग्र्यो भक्तिं चरन् मय्यधिकं समासीत् ॥१७॥

श्रीपादसत्याभिनवेन्द्रवार्ता श्रुता त्वयाऽहो किमिहेति पृष्टः ॥
यथाश्रुतं मामिति वाचमूचे स व्यासराजीयमठावलम्बी ॥१८॥

प्रयागमेत्यामितवैष्णवेतैस्तैस्तीर्थराजं रचितं यतीशैः ॥
गङ्गावगाहार्चनदानपूर्वमपूर्वकृत्यं किल तत्र माघे ॥१९॥

श्रुत्वा तदीयाद्भुतकृत्यवर्यं तत्रत्यदुष्टै रचितं कुकार्यम् ॥
ज्ञात्वा निशायां सपलायनास्ते गङ्गातटेनाययुराशु काशीम् ॥२०॥

तत्रापि सत्क्षत्रियराजगेहे सभाजितैस्तेन महादरेण ॥
विचित्रचारित्रवराकरैस्तैः प्राकारि चित्रं रघुपार्चनाद्यम् ॥२१॥

दिगन्तविश्रान्तयशोर्णवानां श्रुत्वाद्भुतं कर्म यतीश्वराणाम् ॥
काश्यालया दुष्टजना गृहीतुममन्त्रयंस्तान् किल भिक्षुराजान् ॥२२॥

बुध्वा कृतं ते कुजनैः कुकार्यं काश्या विनिर्गत्य पलायमानाः ॥
आसन् किल श्रीचरणा रजन्यामिति श्रुतन्ते क्व गता न जाने ॥२३॥

इतीरितं तद्वचनं मुदाहं श्रुण्वन् ब्रुवंस्तेन यथोचितं च ॥
गङ्गावगाहाद्यनिशं वितन्वन्नापौर्णमास्यावसमत्रपुर्याम् ॥२४॥

दिनेषु तेष्वेव कदाचिदेत्य यः सङ्गमो गण्डिकया द्युनद्याः ॥
तत्रावगाहाद्यचरन्तपोऽब्धिमुनीश्वराधीशमहाप्रसादात् ॥२५॥

स वेङ्कटेशाभिधभूसुपर्वा कदाचिदूचे भयभक्तिनम्रः ॥
मामागतान् श्रीचरणान् गयां तान् श्रुत्वा गमिष्यामि तदीक्षणाय ॥२६॥

तेषां पुरो मद्विषये भवन्तो वक्ष्यन्ति किं तत्र यतीश्वरैस्तैः ॥
ज्ञाते यदि स्यात् मयि तत्प्रसादः स्याज्जन्मसाफल्यमहो यतीशाः ॥२७॥

इतीरितं तेन वचो निशम्य तमब्रुवन्नात्र विचारणा ते ॥
भेदं न जानीहि ममापि तेषामहं त एवेति धरासुधाशम् ॥२८॥

मदुक्तवाग्भावमसावजानन्नेवं वचः प्रीतिपदेषु दृष्टम् ॥
अतस्तथैवेदमपीति जानन् तुतोष मद्वाक्श्रवणेन विप्रः ॥२९॥

योऽस्या नगर्याः प्रभुरस्ति तस्य गयादिदेशोऽप्यखिलो वशेऽस्य ॥
गयापदावान्तरनाथनाम्ना सम्पादनीयां खलु तस्य पत्रम् ॥३०॥

तेनाखिलानां धरणीसुरेन्द्रैः कार्यं गयाश्राद्धमुखं सुखेन ॥
कृत्यं भवेन्नूनमिह द्विजोऽयं पुरेऽत्र दक्षप्रभुसंस्तवेतः ॥३१॥

एतन्मुखेनैव समस्तकार्यं भवेद्ध्रुवं तत्पुरतोऽस्य वक्ष्ये ॥
यथा स्थितं सर्वमिति स्वचित्ते विचार्य सर्वं न्यगदं दशम्याम् ॥३२॥

तुष्टः ससाष्टाङ्गविशिष्टचेष्टः कुतूहलाब्धाववगाहमानः ॥
अजानतेत्युक्तनयो मयाप्तः इति ब्रुवन् मां प्रणनाम भक्त्या ॥३३॥

Rarest Archiver

ततोऽब्रवीन्मां गुरवो मदीयाः नात्रागमिष्यन्ति न संशयोऽत्र ।।
मां तप्तमुद्राङ्कितबाहुमूलं तन्वन्तु नाथा इति सद्विजन्मा ।।३४।।

अनीततच्चक्रदराख्यमुद्रा दण्डो यदास्माकमहीसुरस्य ।।
श्रीमुद्रिकाभ्यो निरकासयं श्रीदरारिमुद्रे कुतुकं तदाभूत् ।।३५।।

ते मुद्रिके दण्डयुगेन सम्यक् संयोज्यतप्ते ज्वलनेन बाह्वोः ।।
बिभ्रद्विजन्तं च निजानकार्षं दिने हरेस्तद्धरचक्रचिह्नान् ।।३६।।

गङ्गावगाहातिरहो निवाससुरार्चनाद्यैर्ननु पट्टणे ज्ञाः ।।
श्रीस्वामिकारुण्यबलेन जीवन्मुक्तस्य सौख्यं समवाप्य तुल्यम् ।।३७।।

तत्पौर्णमास्यां निरगां क्षपायां गन्तुं गयां निर्मितसर्वकृत्यः ।।
तत्पट्टणात् स्वैः सह हर्षपूर्णो लक्ष्मीश्वरोपाख्यनृसिंहपूर्वैः ।।३८।।

पुनः पुनानामनदीं समेत्य स्नात्वा कृतस्वीयसमस्तकृत्यः ।।
गयासमीपं गतवांश्चतुर्थ्यां वैशाखमासासितपक्षगायाम् ।।३९।।

ये सत्यनाथोरुपुरीनिवासाः गयां गताः प्राक् सकला द्विजौघाः ।।
समाययुस्ते निकटं तदानीमभूतपूर्वो मह आजनिष्ट ।।४०।।

वने मनोज्ञे विमले विशाले मृद्भाण्डषण्डै रचितं जनास्ते ।।
विलोक्य पाकादिसमस्तकृत्यं कुतूहलं प्रापुरतीव तत्र ।।४१।।

नीत्वा चतुर्थीं दिन एव तस्मिन् याः पञ्चमीवासरनाडिकास्ताः ।।
ज्ञात्वागता आवृत विप्रसङ्घोऽविशं गयाक्षेत्रमहं रजन्याम् ।।४२।।

गदाधरावासगयां प्रविश्य स्मरन्नधीशान् पितृमुक्तिदात्रीम् ।।
ततो मुदानन्दपदालये तत्सम्प्रार्थितोऽस्वाप्समहं रजन्याम् ।।४३।।

ततः प्रभाते कृतशौचपूर्वसमस्तकृत्यो वरफल्गुसिन्धुम् ।।
समेत्य तत्राप्लवनं सुपुण्यं व्यधां मुदाहं पितृमुक्तिदायि ।।४४।।

स्मरन्नधीशाङ्घ्रिसरोजयुग्मं ततः समस्तैः सुजनैः समेतः ।।
सन्दृष्टवान् श्रीकरविष्णुपादं यदा तदानन्दसमुद्रमग्नः ।।४५।।

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तदेवेदं विष्णुपदं विभाति ।।४६।।

इत्यस्ति यत्पुण्यगयाभिधानक्षेत्रीयमाहात्म्यवचस्तदुक्तम् ।।
प्राप्तं मया स्वामिमहाप्रसादात् फलं तुरीयाश्रमसङ्ग्रहस्य ।।४७।।

मत्तोऽपि यः प्रागिह लोकसङ्घः समागतो म्लेञ्छकृतोरुविघ्नैः ।।
वटस्य सन्दर्शनमक्षयस्य नासीद्यतोऽतोऽभवदेष खिन्नः ।।४८।।

श्राद्धन्तु दूरेऽक्षयसद्वटस्य मूले निरस्तं समभूदमुष्य ।।
यदागमं तस्य बभूव सर्वं श्रीस्वामिमाहात्म्यबलेन नूनम् ।।४९।।

अशेषविप्राः खलु सत्यनाथपुरीनिवासा विदधुर्निकामम् ।।

Rarest Archiver

श्राद्धं गयायां वरविष्णुपादमुखेषु पादेषु पितृप्रमुक्त्यै ॥५०॥

तथा वटश्राद्धमुखं विधाय महातपस्वीशतपोबलेन ॥
ते यापयन्ति स्म पितृनशेषान् तद्ब्रह्म यच्छाश्वतमामनन्ति ॥५१॥

यछ्रीतपस्वीन्द्रतपोबलेन साध्यं गयाश्राद्धमतीव कृछ्रात् ॥
तेषामनायासमभूद्धि तस्मात् न लक्षये नूनं बत तत्सदृक्षान् ॥५२॥

समस्तपित्रुद्धरणप्रयुक्तपुण्योरुपात्रं ध्रुवमस्मदीशाः ॥
दिगन्तविश्रान्तभृशावदातकीर्त्तिं तथापुर्हि महाचरित्राः ॥५३॥

इति वदति गयाख्यक्षेत्रयात्राप्रसङ्गं
यतिकुलतिलके श्रीसत्यनाथप्रभावम् ॥
श्रुतिसुखदमवोचत् साधुवृन्दं निशम्यो-
द्धृतियुतमिति नोऽपि प्राप तद्ध्यानपुण्यम् ॥५४॥

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ॥
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽभूद्दशमो रसज्ञकविभिः संश्लाघनीये जनैः ॥५५॥

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे दशमः सर्गः

Rarest Archiver

॥ एकादशः सर्गः॥

पुनर्बभाषे विबुधान् यतीशः स्वाधीशमाहात्म्यनिबद्धवाणीम् ॥
कुर्वन् कृतार्थान् करुणारसाब्धिः स्वदेशिकाधीशपदातिभक्तिः ॥१॥

श्रीव्यासरामामरसिंहयात्रामितः करिष्ये खिल यात्रिकोच्चाम् ॥
कृत्वेति सङ्कल्पमहं गयायां रात्रौ प्रयाणं कृतवानहो ज्ञाः ॥२॥

ज्येष्ठे दशम्यां सितपक्षगायां निर्गत्य रात्रौ सुजनैर्गयायाः ॥
अधीशमाहात्म्यबलाप्तनूत्नपथेन तां धर्मपुरीं समागाम् ॥३॥

गोदावरीवारिसमीरपूतां मोदावहामात्मनिवासभाजाम् ॥
तोदापहन्त्रीं प्रतिपद्दिनेतां मुदा विशं श्रावणशुक्लपक्षे ॥४॥

ईहाविधातुं वरधर्मधामयात्रां सतस्तारयति ध्रुवं नृन् ॥
भवाम्बुधिं पावनधर्मधामवासस्तुवाच्यः किमु सज्जनेढ्यः ॥५॥

गोदावरीसिन्धुवरप्रतीरे नीरेण पूर्तिर्जठरस्य जन्तोः ॥
वरं त्यजेत्याय समप्युपेतसच्छर्कराक्षीरमितोपरत्र ॥६॥

इत्यादिवाक्योक्तमहामहत्वे सादुस्तुते धर्मपुरेऽत्र मे स्यात् ॥
यतिव्रतं मासचतुष्टयस्य भवेन्महापुण्यमदीश्वराणाम् ॥७॥

इत्थं विनिश्चित्य निवासयोग्यमासव्रतं श्रीकरधर्मपुर्याम् ॥
क्षेत्रे व्यधां श्रीनरसिंहदेवविभूषितायां मुनिदेवभूमौ ॥८॥

क्षेत्रोत्तमे धर्मपुरे समाप्य कर्मन्दिवासोचितमासकृत्यम् ॥
श्रीव्यासरामामरनाथयात्रां विधातुमुत्कंठितमानसोऽहम् ॥९॥

निर्गत्य तत्क्षेत्रवरान्नभस्य कृष्णद्वितीयादिवसे तदास्ताम् ॥
तौ यत्र देवौ सह सत्यनाथपुरीनिवासैः सुजनैः समागाम् ॥१०॥

त्रयोदशी वासर आविशन्तं श्रीकृष्णवेणी तटिनी तटस्थम् ॥
ग्रामं हि कोलूरूपदं बुधा भूवैकुण्टमात्मस्थितरामदेवम् ॥११॥

श्रीकृष्णवेण्यामवगाह्य नाथमहाप्रसादाद्गतवान् मठं तम् ॥
श्रीव्यासरामप्रतिमादिदृक्षापूर्णो नमन् दण्डवदेव भूमौ ॥१२॥

यो भून्महोऽभूतचरस्तदा तं द्रष्टुं सहस्राण्यपि लोचनानि ॥
नालं महं तं ददृशुर्जना ये नेत्राणि तेषां सफलानि नूनम् ॥१३॥

आदर्शराजद्रजतासनाग्रे समास्तृते वस्त्रवरे विचित्रे ॥
विराजमाने वरहेमपीठे रविप्रकाशे नयनोत्सवेऽलम् ॥१४॥

मदिङ्गितज्ञादरशालिसत्याधीशाख्यकर्मन्दिकृतोपवेशाः ॥
विभूषिता भूषणराजवृन्दैर्देदीप्यमानैः सुविचित्ररत्नैः ॥१५॥

पुष्टातिचार्वास्यदृगादिकाङ्गीः सम्भाषमाणा इव दृश्यमानाः ॥
अनेकसूर्यप्रतिमाः समस्ताः रामादिदेवप्रतिमाप्रधानाः ॥१६॥

Rarest Archiver

श्रीस्वामिकारुण्यबलादपश्यं कृतेशचित्रोपकृतानुसन्धिः ॥
समन्ततोऽभ्यागतलोकपालिसम्बधरम्यं प्रविशं मठं तम् ॥१७॥

प्रविष्टवैकुण्ठ इवाह मासं स्वानन्दसान्द्रो गतबाह्यबोधः ॥
आलोक्य रामप्रतिमादिकास्ताः ईशप्रसादेन मठं प्रविश्य ॥१८॥

अहो मयीशां करुणाविशेषो मामप्यशक्तं कृपयैव नीत्वा ॥
काशीं समानीय पुनर्मठं स्वं श्रीव्यासरामार्चकमाचरन् यत् ॥१९॥

काश्यादियात्रा रघुनाथवेदव्यासोरुयात्रा सुकृतं समर्प्य ॥
श्रीरामचन्द्रस्य नमोऽचरन्तं धन्योऽहमद्येत्यनुसन्दधानः ॥२०॥

ततोऽस्मदीशोरुकृपावशेन स्नात्वापगायां रगुनाथपूजाम् ॥
कुर्वन् यमानन्दमवाप्तवांस्तन्मितिर्न तस्मिन् दिवसे बुधाग्र्याः ॥२१॥

दिनं तदारभ्य महार्धमासावभूतपूर्वां रघुनाथपूजाम् ॥
स्वामिप्रसादेन चरन् मठे भूवैकुण्ठरूपे न्यवसं स्म तत्र ॥२२॥

एवं स्थितं तत्र जनास्तदामामित्यूचिरे पुण्यवतां भवन्तः ॥
महात्मनां सारतमा जगत्यामतोऽन्यथेदृग्घटते न कृत्यम् ॥२३॥

कालःकलिः पापतमो न्यपेतधर्मोऽभितो म्लेच्छवृतश्च देशः ॥
तथापि काशीमुखपुण्यभूमियात्रां विधायैतमहो भवद्भिः ॥२४॥

काशीं ययुः श्रीचरणानकेऽपि प्रायोगता ये पुनरागता न ॥
विद्याद्यधीशाभिधया प्रसिद्धास्तद्भागधेयं भवतामतुल्यम् ॥२५॥

इत्यादि वाचं ब्रुवतो जनांस्तानापातबोधानवदन् ततोऽहम् ॥
भ्रान्ता भवन्तः क्व महात्मविद्याधीशेश्वराः क्वाहमुदीरितं किम् ॥२६॥

दिगन्तविश्रान्तयशःशरीराः विद्याविरक्त्यादिगुणाकरास्ते ॥
समस्तवादीन्द्रकरीन्द्रसिंहाः श्रीव्यासरामाङ्घ्रिसरोजभृङ्गाः ॥२७॥

यदीयकृत्यानि महाद्भुतानि स्मर्तुं न शक्यानि जनैरशेषैः ॥
क्वतेमहान्तो यतिराजराजाः क्वाहं तदङ्घ्र्यम्बुजदासदासः ॥२८॥

काशीबदर्यादिपदं गतानामनागतौ कारणमत्र वक्ष्ये ॥
तेषां प्रभूणां जगतां गुरूणामिहागतौ मेऽपि बुधा अहो वः ॥२९॥

माघे प्रयागेऽखिलतीर्थराजे स्नात्वा विधानेन विशुद्धचेताः ॥
यः पूजयेन्माधवदेवदेवं वैकुण्ठलोके निवसेच्चिरं सः ॥३०॥

इत्यादिमानाद्धरिलोकमाप्तास्ते भूमिवैकुण्ठमठे निवासः ॥
ममापि तेषां न कुतोऽत्रवास इत्यादिशङ्कापि निवार्य ते वः ॥३१॥

मूर्तेर्व्रतैः शोषणमञ्जसास्याः कार्यं हरिप्रीतिकरं नितान्तम् ॥
नित्येतरस्या भुवि यावदायुरित्युच्चसङ्कल्पकृतस्त ईशाः ॥३२॥

तदीदृशां नैव भवेत् सुखं भूवैकुण्ठवासेन यतोऽखिलज्ञः ॥
वैकुण्ठलोकं तमयच्छदेभ्यो वियोज्य कायान्ननु माधवस्तान् ॥३३॥

Rarest Archiver

अतादृशं मामवलोक्य विष्णुः श्रीभूमिवैकुण्ठमठे निवासम् ।।
प्रयागतीर्थे सुरनिम्नगायां स्नातस्य माघे समदान्ममेति ।।३४।।

श्रुत्वा मदुक्तं सरसा जनास्ते स्वान्दोलयंस्तत्र खलूत्तमाङ्गम् ।।
ध्रुवं वयं स्थूलदृशोयमेव भावो महल्लाल्य इति ब्रुवन्तः ।।३५।।

कालेऽपि दुर्भिक्षयुतेऽपि तत्र स्वामिप्रसादेन सुरार्चनाद्यम् ।।
कुर्वन् वरार्चाकरणैः तिथिर्या पुण्यास्मदीशामवसं हि तावत् ।।३६।।

विधाय वेदाद्रिनृसिंहयात्रां महासमाराधनमारचय्य ।।
ततोऽस्मदीशां तदधीश्वराणां वृन्दावनं प्रस्थितवान् मुदाहम् ।।३७।।

श्रीकृष्णवेणीप्रमुखापगानां यस्सङ्गमः तं गतवान् समीक्ष्य ।।
वृन्दावनं सत्यनिधीश्वराणां कृतार्थ आसं सकलं समर्प्य ।।३८।।

ततः प्रभुप्रार्थनया गतोऽहं यत्कन्दनोल्वाख्य पुरं तदादि ।।
अभूतपूर्वां च रमेशपूजां मन्त्रोपदेशाद्यचरं जनानाम् ।।३९।।

तदादवान्याख्यपुरादिकेषु पुरेषु या श्रीरघुनाथपूजा ।।
व्यजायताधीशमहाप्रसादात् सा केन वाच्या कवयोऽतिचित्रा ।।४०।।

अहोबलक्षेत्रमिथो समेत्य तत्रत्यतन्नामनृसिँहदेवम् ।।
आलोक्य नत्वार्च्य तदाज्ञयाऽहं पिनाकिनीतीरमगां प्रशस्तम् ।।४१।।

गत्वा ततः श्रीचरणाग्र्यवेदव्यासेन्द्रवृन्दावनमार्यवन्द्यम् ।।
दृष्ट्वाभिवन्द्यार्च्य तथान्वभावीशानुग्रहेणैव महामहोऽत्र ।।४२।।

ततोऽरुणाख्यं गतवान् सुगोत्रं क्षत्रोत्तमं तीर्थनिकायरम्यम् ।।
श्रीनाथपूजां कतिचिद्दिनानि वसन् व्यधां तत्र पतिप्रसादात् ।।४३।।

ततो हि चञ्चीपदराजधान्यां यतीशवासोचितमासयुग्मे ।।
महानुकूलेन्यवसं सुरेन्द्रसद्मोपमागारवरे मुदाहम् ।।४४।।

श्रीमज्जगन्नाथपदप्रभूच्चमहादरप्रत्तगजाश्वपूर्वैः ।।
महार्हणैश्चित्रविचित्रपुष्पपूर्वैरपि श्रीशमपूजयं स्म ।।४५।।

अगां ततो वेङ्कटभूधरेन्दं द्रोणीकुलस्थाखिल सन् मृगेन्द्रम् ।।
नानातरूपेतवनालिसान्द्रं स्वावासिलक्ष्मीप्रमुखामरेन्द्रम् ।।४६।।

अंहो लवित्रं बहुतीर्थपात्रं देवर्षिसत्रं कपिराजिचित्रम् ।।
ततोऽहिगोत्रं मुदितोऽतिमात्रं वीक्ष्याहमासं सहमाकलत्रम् ।।४७।।

मध्ये पथं विश्रममण्टपाग्र्यैः सोपानसार्थैरुरुगोपुरैश्च ।।
विभ्राजमानं गिरिपुङ्गवं तमारोहमभ्रङ्कषतुङ्गश्रृङ्गम् ।।४८।।

स्वाम्याख्यसत्पुष्करणीसमेते कान्तारकान्ते गिरिराजापृष्टे ।।
विराजमाने निलये विशाले विराजमानौपलसालजाले ।।४९।।

चित्रौपलस्तम्भतुलादिरम्ये वैकुण्ठगश्रीशनिकाय्यकल्पे ।।

Rarest Archiver

समुल्लसन्तीं प्रतिमामवेक्ष्य लक्ष्मीनिवासस्य नतोऽस्मि तोषात् ।।५०।।

तामुत्तमाङ्गाद्यतिसुन्दराङ्गीं दोर्भिश्चतुर्भिः प्रतिमां लसन्तीम् ।।
अनन्तसूर्यप्रतिमां श्रियालं कोवर्णयेद्वेङ्कटनायकस्य ।।५१।।

विधाय वासं कतिचिद्रमेशं दिनान्यहं वेङ्कटभूधरेशम् ।।
तत्रार्चयं भानुततिप्रकाशं सुरेशपूज्यं रचिताखिलाशम् ।।५२।।

ततोवरूह्याहिधरात्तदीशनिदेशतो यां पुरमाशु काञ्चीम् ।।
दृष्ट्वा नमन् दृष्टमनास्तदीशं विरिञ्चिपूज्यं वरदाधिराजम् ।।५३।।

सत्याभिनवतीर्थेन्द्रगदितामिति भारती ।।
श्रुत्वागुरुप्रभावेतां सतः सन्तोषिणो भवन् ।।५४।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरूसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्येऽभूगुणसारलुब्धकविभिः सर्गस्तथैकादशः ।।५५।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे एकादशः सर्गः

Rarest Archiver

॥ द्वादशः सर्गः॥

स साधुराजो गुरूराजसत्यनाथेन्द्रपादाम्बुजभृङ्गराजः ॥
पुनश्च सत्याभिनवाह्वयश्रीपादोऽगदच्छ्रोतुमुदावहां गाम् ॥१॥

काञ्च्यां मठे ज्ञा वसताप्रशस्ते निमज्य नद्यामथ वेगवत्याम् ॥
स्वामिप्रसादाद्रघुनाथपूजा व्यधायि चित्राश्रुतदृष्टपूर्वा ॥२॥

तत्रापि माहात्म्यमधीश्वराणां तत्रत्यलोकानुभवप्रमाणम् ॥
यत्प्रादुरासीत् तदपि प्रवक्ष्ये यस्मिन् श्रुते स्यादति विस्मयो वः ॥३॥

तूर्णं कदाचिद्वरवेगवत्यां स्नात्वार्च्य रामं वरदेश्वरस्य ॥
सद्यागमं कारयितुं मुदाहं महाभिषेकादिमहं महान्तम् ॥४॥

तत्रोत्सवेऽहो सति सम्प्रवृत्ते वार्ता जना मामवदंस्तदेति ॥
महाननर्थोऽद्य समागतोऽस्ति मठोऽवरुद्धः खलु राजदूतैः ॥५॥

ताम्रास्यनाम्नाप्रथितास्तुरूष्का बलादगृह्णन् कलिकोणपास्ते ॥
भागापुरं नूनमितीह वार्ता समागताश्रावि तुरुष्कराजैः ॥६॥

नपक्षपात्यस्ति महीसुराणां यत् साम्प्रतं कोऽपि ततो निरोध्याः ॥
विभूतिमन्तः प्रभवः प्रसिद्धाः तन्निग्रहेऽयं समयो ध्रुवं नः ॥७॥

इत्थं समालोच्य तुरुष्कलोकाः प्रभुं द्विजं सम्प्रति रामचन्द्रम् ॥
निगृह्य बाधन्त इति प्रबुध्य विलिल्यिरेऽन्ये प्रभवोऽप्यशेषाः ॥८॥

नाथा भवन्निग्रहवाञ्छयेतैरर्थाशयेतैर्यवनैर्नियुक्ताः ॥
दूता मठं नः समुपेत्य तस्य द्वारि स्थिताः सम्प्रति दुष्टचित्ताः ॥९॥

उद्विग्नचित्तैरिति भाषितां तैर्वार्तां समाकर्ण्य विपत्समुद्रः ॥
प्राप्तस्तरीतुं पतिपादपद्मस्मृतिं विना साधनमस्ति नान्यत् ॥१०॥

इत्थं विनिश्चित्य तदास्मरं श्रीकरेऽखिलानिष्टहरे पतीनाम् ॥
पादाम्बुजे श्रीवरदाधिराजमहं प्रवृत्तं समवेक्ष्यमाणः ॥११॥

तदैव नाथाङ्घ्रिसरोरुहोरुस्मृतिप्रभावेन तुरुष्कभर्तुः ॥
सतीमतिस्तन्निकटस्थसाधुजनोपदिष्टस्य बभूव चित्रम् ॥१२॥

ते भिक्षुकास्तत्र किमस्ति लोके तन्निग्रहेस्यात्तु महापकीर्तिः ॥
प्रबोधितस्तैरिति स स्वदूतानाह्वाययन् म्लेच्छपतिः स्वपार्श्वम् ॥१३॥

आकर्ण्य वार्तामिति तत्र देवालये भृशं विस्मित ईश्वराणाम् ॥
स्मृतेः प्रभावं पदयोः प्रशंसन्नगां मठं देवमहं समाप्य ॥१४॥

निमज्य पूजां रघुनन्दनस्य विधाय भूयोऽधिपतिप्रसादात् ॥
अपेतभीर्नित्यमिवार्हणोच्चैः भिक्षां तथाश्नामि पुराथ तत्र ॥१५॥

अधीशधामप्रकटं विधातुं हरीच्छयासीदसती मतिर्हि ॥
तुरुष्कवर्यस्य पुनः कुलोकप्रचोदनेनाथ विनिग्रहे नः ॥१६॥

समाप्य सान्ध्यादिसमस्तकृत्यं यदोपविश्य व्यचरं सभायाम् ॥

Rarest Archiver

ऋङ्वाङ्मुखं मां समुपेत्य तूर्णं द्वौभूसुरावूचतुरित्युदन्तम् ।।१७।।

ते भाग्यवन्तो यतिराजराजाः तन्निग्रहे स्यात् बहुवित्तलाभः ।।
म्लेच्छाधिपेनेति विबोधितेनासद्भिः समागुः प्रहिता स्म दूताः ।।१८।।

निर्गम्यतां सम्प्रति मा विलम्बः प्रगृह्य पेटीः सहितामरार्चाः ।।
नो चेदनर्थो भवतामिहस्यात् ब्रूमो वयं सत्यमतोऽन्यथा न ।।१९।।

श्रुत्वेति वार्त्तां निरगां त्वरावान् द्वारं महच्चावृतमागतैस्तैः ।।
प्रगृह्य दण्डं मठपाकगेहाणुद्वारतो नाथपदाब्जाचित्तः ।।२०।।

दक्षो भृशं लक्ष्मणनामको यः स देवपेटीः सकलाः प्रगृह्य ।।
वीतप्रमादो निरगान् मयामा रात्र्यादिभागे विमुखप्रतीतौ ।।२१।।

तल्लक्ष्माणाद्यैर्मुनिशीलभाग्भिरवाहनो वेगवतीं त्वरावान् ।।
उल्लङ्घ्य दूरं समुपेत्य तत्रासीनः समासं निजमेलनाय ।।२२।।

इषाख्यमासे नगरं विसृज्य तत्पञ्चमेहन्यसिताख्यपक्षे ।।
शुक्राख्यवारे स्थितवान् क्षपायामब्जोदयन्तत्र महान्धकारे ।।२३।।

गत्वा मठं सर्वमरे विचारं विधाय तत्रोचितमाचरय्य ।।
त्वं लक्ष्मणायाहि पुनर्मदङ्कमुक्त्वेति तं यापितवान् मठं नः ।।२४।।

श्रीस्वामिपादस्मरणप्रभावबलेन देवालयगास्तदागुः ।।
ये दोलिकावाहकपूरुषास्ते तदर्यदृष्टाः सहदोलिका माम् ।।२५।।

कुतूहलं प्राप्य विधूदयेऽहं दोलां समारुह्य नियोज्यवर्गैः ।।
कोन्तोपनामाङ्कितवेङ्कटेशसङ्कर्षणाद्यैस्त्वरया पुरोऽगाम् ।।२६।।

अदभ्रमध्वानमतीत्य रात्रौ तूर्णं प्रभाते सति शिष्यवर्गैः ।।
सहारणीनामपुरीसमीपं यान्मण्टपे तत्र निषण्ण आसम् ।।२७।।

अत्यद्भुताधीशतपःप्रभावमनुस्मरन् कौतुकवारिराशौ ।।
चरन् विहारं ननु वाहकादिश्रमापनोदाय निषण्ण आसम् ।।२८।।

स लक्ष्मणो मत्प्रहितो यदागात् मठं तदा दुर्यवनेशदूताः ।।
मठं प्रविश्यान्तरलं विमृश्यानवेक्ष्य निश्चिक्युरतो गतं माम् ।।२९।।

निर्भर्त्स्य तत्रत्य जनान् मठीयानर्थानशेषान्निजमुद्रयेतान् ।।
विधाय राजानमयापयत् स्वं पत्रं विलिख्येति ततो हि दूताः ।।३०।।

मध्याह्न एवाद्य गता यतीशाः प्रायः पदार्था अपि तैस्सहैव ।।
शिष्टाः पदार्था इह सन्ति राजन्नितः परं कार्यमहो नियुङ्क्ष्व ।।३१।।

तत्प्रेषितं पत्रमवेक्ष्य सोऽलं म्लेच्छाधिपस्वान्तिकगैर्नियोज्यैः ।।
साधुस्वभावैरिति भाषितश्च पुम्भिर्निशम्येति तदा बभाषे ।।३२।।

यदा गतास्ते किमतोऽस्ति कृत्यं शिष्टैः पदार्थैः भवितापकीर्तिः ।।
शिष्टान् पदार्थानखिलान् प्रगृह्य मठीयलोका अधुनैव यान्तु ।।३३।।

Rarest Archiver

आह्वाययामास निजांश्च दूतान् आयात यूयं त्वरयान्तिकं ते ।।
आत्ताखिलार्था अधुनैव यान्तु का धीः कदावेति सदुक्तिपूर्वम् ।।३४।।

त्यक्त्वा तदाज्ञावशतोऽस्मदीयानर्थान् समस्तान् प्रययुर्यथेतम् ।।
ते राजदूता निजनायकाङ्कमधीशपादस्मरणेन चित्रम् ।।३५।।

यो लक्ष्मणो दक्षतमः क्षपायां मत्प्रेषितस्तन्मठमेत्य तूर्णम् ।।
दक्षैस्तथा वेङ्कटपूर्वपत्याह्वयादिविप्रैर्विगतप्रमादैः ।।३६।।

कृतः स्वकार्यः सहसोर्द्धरात्रे सज्जः समस्तार्थभरान्निधाय ।।
शक्तेषु गाढं वृषभेषु साकं तैराययौ मामथ तोषपूर्णः ।।३७।।

आयान् स दूतं पुरतो ममाङ्कमयापयद्विश्रमणाय यत्र ।।
आस्थायि नाथाङ्घ्रिहृदा निजानामुपेत्य सर्वं समुवाच वृत्तम् ।।३८।।

अरोमवक्रत्वममाखिलार्थैरिहाययौ लक्ष्मण एष नूनम् ।।
इतः समास्तेऽनतिदूर एष भवद्दयानिर्मितसर्वकार्यः ।।३९।।

सन्तं तदोदन्तमहं निशम्य श्रीस्वामिमाहात्म्यमहाप्रकाशम् ।।
इतीरितं तेन समानमं तदधीशमाहात्म्यवराय नृत्यन् ।।४०।।

अहो दयाधिनाथानां मामनुद्धारकं यतः ।।
महापदम्बुधौमग्नमुद्धरन्ति पुराधिपाः ।।४१।।

गुरुस्त्राता गुरुस्त्राता गुरुस्त्राता न संशयः ।।
इति स्मृतेर्यत्प्रामाण्यमनेनास्थापयन्निनाः ।।४२।।

एतस्या विषयाभावात् प्रामाण्यं नु कथं भवेत् ।।
इति शङ्का निरातङ्कावनतो मे हि तैर्गता ।।४३।।

इति ब्रुवन् पुनः पुनः प्रमोदवारिधावहम् ।।
व्यधां विहारमास्मृतेशकृत्यराजवर्धिते ।।४४।।

गत्वारणीनामपुरी मधीशप्रसादसंवृद्धरमेशपूजः ।।
समुष्य तस्यां कतिचिद्दिनानि मुदा ततः प्रस्थितवानहं हि ।।४५।।

उद्दामवारिधिमदीश्वरतीर्थराजवृन्दावनं परमपावनमागमं ज्ञाः।।
प्राग्जन्मराशिरचितामितपुण्यधामलब्धाधिनाथकरुणारससराशिनाहम् ।।४६।।

सुकृतं सुकृतं पुरा बुधाः फलितं सांप्रतमेतदीक्षणात् ।।
सफलं मम जन्म देवता मुदिता मे गुरवोऽखिला अपि ।।४७।।

आधीशप्रसादात् महो जायते यो भवद्भिर्बुधाग्र्याः स आलोक्यतेऽहो ।।
सदृष्टः श्रुतो वामृषा वा मृषा वा ब्रुवन्तूत्तरं वीतरागादिदोषाः ।।४८।।

सत्काञ्चीरघुनाथनामकमहाचार्यादिलब्धाक्षरा
इत्येतद्वचनामृतं सुखकरं श्रोत्राञ्जलिभ्यां पपुः ।।
श्रीसत्याभिनवास्यदुग्धजलधेः सञ्जातमग्र्यं वरे
ग्रामे चोळवरान्त्यवीरपदके धन्याग्रगण्या क्षितौ ।।४९।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे

Rarest Archiver

शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्येतद्गुणसारलुब्धकविभिः सर्गोऽभवद्वादशः ।।५०।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे द्वादशः सर्गः

Rarest Archiver

॥त्रयोदशः सर्गः॥

ततो गुरुश्रीकरपत्सरोजसमर्पिताशेषभरः स गत्वा ॥
श्रीमुष्णनामादिवराहदेवस्थानं महाक्षेत्रमुवास तत्र ॥१॥

नित्यं स नित्याभिधपुष्करिण्यां निमज्य सन्निर्मितरामपूजः ॥
रथादिसंस्थादिवराहमूर्त्तिमहं महान्तं यतिराट् ददर्श ॥२॥

सदागमाख्यानमुखोच्चकृत्यान् सद्वासुदेवार्यमुखान् दयालुः ॥
आचार्यवर्यान् प्रवणान् गुणाढ्यानाह्लादयामास च सर्वविप्रान् ॥३॥

क्षेत्रे स तस्मिन् कतिचिद्दिनानि समुष्य सन्तोष्य वराहदेवम् ॥
चिदम्बरक्षेत्रमुपेत्य चक्रे कर्माभ्रकासारनिमज्जनाद्यम् ॥४॥

मघर्क्षयोगान्वितपूर्णिमायां रत्नाकरं प्राप्य ततो यतीशः ॥
तत्राम्बराचुम्बिसुदृश्यलोलकल्लोलपालौ विधिवित् ममज्ज ॥५॥

तदाप्लुताशेषजनाघराशिभङ्गं तरङ्गोरुकरप्रहारैः ॥
कुर्वन्निवोद्घोषमहाट्टहासैः संरम्भभीष्मो विरराज सोऽब्धिः ॥६॥

यद्घातसङ्गामलदेशवासात् प्रयान्ति मुक्तिं सुजनाः समेत्य ॥
कवेरकन्यां तटिनीं स मान्यां स्नानादिसत्कृत्यमथो चकार ॥७॥

ततः स तञ्जावरराजधानीराजा सताञ्च प्रभुराजसङ्घैः ॥
स्वराष्ट्रवासाय विभूतिमद्भिरभ्यर्थितोऽभूत् क्षितिदेवराजः ॥८॥

शताङ्गतुङ्गाश्वमतङ्गजादिप्रभूतचम्वा प्रभुभिः समेतैः ॥
सुदूरमभ्येत्य यदार्थितोऽभूत् वैराग्यभाग्योऽपि दयास्ववश्यः ॥९॥

विरोधिहृद्दारकशङ्खतालतुर्यादिनानाविधवाद्यघोषम् ॥
लोकेऽखिले पश्यति कुम्भघोणक्षेत्रं विवेशोरुजनैर्यतीशः ॥१०॥

कर्मन्दिराजोऽथ स शार्ङ्गपाणिं श्रीकुम्भघोणाधिपतिं रमेशम् ॥
श्रीचक्रपाणिं गतवान् विलोक्य कुम्भेश्वरञ्चादरतो ननाम ॥११॥

अभ्येत तञ्जावरराजधानीराजानतस्तां नगरीं प्रविश्य ॥
असौ मुदा संसदि सूरिसिंहो दुर्वादिमत्तद्विरदान् ममर्द ॥१२॥

राजा स दुर्वादिजयश्रिया तं विराजमानं द्विजराजराजम् ॥
सभाजयामास सभाजनीयपाण्डित्यभूषं कृतलोकतोषम् ॥१३॥

पुनः समेत्याथ स कुम्भघोणं पादं निधाय स्वविरोधिमूर्ध्नि ॥
कवेरकन्यातटगं मठाग्र्यं स्वकारितं तत्र मुदाध्युवास ॥१४॥

तपस्विवासोचितमाससङ्घं तस्यां तटिन्यामवगाह्य नित्यम् ॥
चित्रैर्विचित्रैः फलपुष्पपूर्वैः अर्थैरभूतं हरिमार्चयद्धि ॥१५॥

धन्याग्रगण्यः स्वगुरुप्रभावं सन्यासिराजोऽद्भुतमीरयन् स्वान् ॥
मान्योऽखिलैः सन्ततमादरेणावन्यां सकालं चरति स्म सार्थम् ॥१६॥

यो भागिनेयो वरपूर्णबोधाचार्यस्य लोके प्रथितस्य शिष्यः ॥

Rarest Archiver

प्रौढाग्रणीस्तत्वविदां प्रबर्हो नृसिंहनामा प्रथितः समासीत् ।।१७।।

यश्चाद्भुतान् वीक्ष्य गुणानपारान् त्रिविक्रमाख्योऽत्यभिवृद्धभक्तिः ।।
सत्तीर्थसत्याभिनवेन्द्रशिष्यो विदां प्रबर्हः प्रथितः समासीत् ।।१८।।

यो दम्मलोपाह्वयकृष्णनामाचार्यस्तथोम्रज्युपनामयुग्यः ।।
नारायणाचार्यपदोऽभवत् यो व्यासोपनामाङ्कितकेशवार्यः ।।१९।।

तदादयः सूरिवरा विलोक्य भक्त्या स्मरन्तं स्वगुरुं सदालम् ।।
सुविस्मयाः श्रीचरणं महान्तमित्यस्तुवन् तं ननु कुम्भघोणे ।।२०।।

श्रुता नरः कौ गुरुभक्तियुक्ताः तथापि नैतादृशतीर्थभक्ताः ।।
दृष्टाः श्रुता वा यदहो गुरुणां स्मृतिर्भवद्भिः क्रियते सदालम् ।।२१।।

प्रत्यक्षमित्थं विनुतो यतीशो मन्दस्मितः तानवदत् मुदा सः ।।
सत्यं यदद्योक्तमहो भवद्भिः तथापि वक्ष्येऽत्र विशेषबीजम् ।।२२।।

प्रतिक्रियं यत्स्मरणं गुरूणाममोघतद्वाक्यत एव नूनम् ।।
ममान्यथातोऽधिकमस्ति शृङ्गं के किं भवद्भ्योऽत्र वदन्तु सत्यम् ।।२३।।

नाथाः पुरा मामवदन्नमोघवाक्याः कृतघ्नाः सकला मदीयाः ।।
त्वमेक एवात्र न वै कृतघ्नो न संशयोऽत्रेत्यसकृन्महान्तः ।।२४।।

चरन्ति सेवां भवतां समस्ताः सदा मनाक् तां न चराम्युताहम् ।।
भुक्त्वा सुखेनैव यतोऽस्मि तूष्णीमतः कथं सङ्घटते भवद्वाक् ।।२५।।

मयेति पृष्टा अवदंस्तदा मां यदेक एवोपकृतिं सदा नः ।।
स्मरिष्यसि त्वं न परे तथातः तथा मया प्रोक्तमितीशराजाः ।।२६।।

इतीशवाक्याशयवित् तदीयवाक्येन सन्तुष्टमनाः समासम् ।।
अमोघतद्वाक्यबलेन तस्मात् स्मृतिः प्रभूणां परथा न चाहो ।।२७।।

विद्वत्प्रबर्हा इति ते नृसिंहाचार्यप्रधना अनुमोदमानाः ।।
तदीरितं तत्कृतनित्यनूत्नचित्राः क्रिया वीक्ष्य पुनः शशंसु ।।२८।।

क्वचित् कदाचित् न हि दृष्टपूर्वाः पुरा श्रुता वेह भवन्ति नित्यम् ।।
नित्यं नवीनाः विहिताः क्रियाया अमानुषा लोकसुखावहाः ताः ।।२९।।
इति स्तुतोऽसौ गुरुराट् प्रभावं स्मरन् बभाषे सबुधान् बुधाग्र्यः ।।
श्रीस्वामिनो मां व्यधुराख्ययाहो बुधा हि सत्याभिनवं तदेताः ।।३०।।
करिष्यमाणा अमुना क्रियाया सत्या अजस्राभिनवा भवेयुः ।।
सर्वज्ञराजैरिति भावविद्भिश्चक्रे हि सत्याभिनवेति नाम ।।३१।।

तत्स्वामिसंस्थापितदिव्यनाम महामहिम्नैव समीर्यमाणाः ।।
क्रिया भवद्भिर्न विचारणात्र सत्यं वचः सत्यमिदं बुधाग्र्याः ।।३२।।
नृसिंहनामार्यमुखा निशम्य सयुक्तिकं प्रोक्तमनेन रम्यम् ।।
अमन्दमानन्दमवाप्य धीरा आन्दोलयन्ति स्म निजोत्तमाङ्गम् ।।३३।।

Rarest Archiver

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्धिरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽत्रावासितं त्रयोदश इतो लाल्योऽभवत् साधुभिः ।।३४।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे त्रयोदशः सर्गः

Rarest Archiver

।। चतुर्दशः सर्गः।।

स्वाधीशमाहात्म्यकथासुधायाः पानं विनाहो क्षणमप्यशक्तः ।।
स्थातुं स सत्याभिनवाख्यतीर्थो भूयो बुधान् तन्महिमानमूचे ।।१।।

श्रेयोऽतिविघ्नप्रद एष कालः सद्वैरिताम्रास्यतुरुष्कबाधा ।।
दुर्भिक्षपीडापि समस्तराष्ट्रे प्रभुः प्रसिद्धो न हि भाति कोऽपि ।।२।।

तथापि या श्रीरघुनाथपूजा नित्याभिवृद्धा द्विजराट्कलेव ।।
प्रवर्तते प्राक्तनतोऽधिकाहो प्रत्यक्षमाना न हि कापि पीडा ।।३।।

अहो तदेतन्मदधीश्वरश्रीमहामहिम्नैव न संशयोऽत्र ।।
न चेदहं क्व क्व च भाग्यमेतदत्यद्भुतश्रीपतिपूजनाद्यम् ।।४।।

यदा यदा स्यान्महती विपन्मे महामहिम्नैव मदीश्वराणाम् ।।
तदा तदानन्यनिवारणीया निवार्यते सत्यमहो बुधाग्र्याः ।।५।।

पुरा यदाब्दे नलनामधेयेऽहं सङ्गलिग्यामवसं तदानीम् ।।
देशं समन्ताच्छिवराजनाथा अकालयन्नर्थमनोरथेन ।।६।।

अर्थातुरास्ते शिवराजशूद्राः दुष्टाः प्रतिग्राममुपेत्य चम्वा ।।
सम्बाध्य सर्वान् धनगोधनाद्यान् पदार्थसार्थननयन् प्रहृष्टाः ।।७।।

पुनश्च शूद्रा अधिकार्थवाञ्छास्तैलार्द्रवस्त्रोज्वलदीपपूर्वैः ।।
देहानबाधन्त खला जनानामपानुकम्पास्तनुमात्रभाजाम् ।।८।।

पीडां चरन्तोऽखिलदेहिनां ते वित्तातुराः सङ्गलिगीं समायन् ।।
सभाग्यलोकाः पुरि तत्र नूनं सन्तीति मत्वा सह भूरिसेनाः ।।९।।

तदाह मासं विनिमज्य कृष्णातटे जपंस्तत्र समेत्य विप्रः ।।
धूमाभिधो मामवदत् प्रवृत्तिमुद्विग्निचेता इति कम्पिताङ्गः ।।१०।।

अहो इदानीं शिवराजराजो नरः समायन् सह भूरिचाम्वा ।।
ते पीडयिष्यन्ति जनानशेषानितःपरं किं करवाम कार्यम् ।।११।।

श्रुत्वेति तद्वाक्यमहं जवेन मठं समेत्यामरपेटिकाद्यान् ।।
अयापयं कस्यचिदाशु गेहं महादरिद्रस्य हि रक्षणाय ।।१२।।

कृत्वापि तद्रक्षणयोगमासं भीतो भृशं तं पुरुभाग्यशाली ।।
यच्छार्थमित्यर्थसमीहया ते मां पीडयेयुर्ध्रुवमित्यहो ज्ञाः ।।१३।।

त्यक्त्वा स्ववेषं गृहमेधिवेषः स्वीकार्य एवेति मतिं विधाय ।।
अगां दरोद्वेपितहस्तपादो मठान्तरे देशविशेषमेव ।।१४।।

तदा द्विजा ग्रामगताः समस्तास्तच्चौद्रसैन्यं समवेक्ष्य भीमम् ।।
कर्तव्यमूढा भयकम्पिताङ्गास्तूर्णं मठं संविविशुर्बुधाग्र्याः ।।१५।।

तत्रा गतं ज्ञा अवदं तदैव विद्यापतिं शिष्यमरे प्रयच्छ ।।
त्वदीयवस्त्रे गृहमेधिवेषं गृहीतुमित्यागतदुष्टभीतः ।।१६।।

Rarest Archiver

स्वामिप्रसादादिति शेमुषी मे जज्ञे समानीय भयापहत्यै ।।
श्रीस्वामिपादाङ्कितपादुके ते मयोत्तमाङ्गेन जवेन धार्ये ।।१७।।

ततो विलम्बासहमान आशु यत्र स्थिते ते पतिपादपीठे ।।
तत्राहमेवैत्य भयापहत्यै प्रगृह्य दोर्भ्यामधरं स्वमूर्ध्नि ।।१८।।

अहो गताः भीः पुरुवेपथुर्यो देहेऽभवत् सोऽपि तदा विनिष्टः ।।
धैर्यं महन् मां समगाद्धृते ते मूर्ध्ना यदा श्रीकरपादपीठे ।।१९।।

धैर्यं गेतोऽथो मठशालिकायां जपन्निवास्थापितविष्टरेऽहम् ।।
गलोल्लसच्छ्रीतुलसीमणीन्द्रमालो निषण्णः करगाक्षमालः ।।२०।।

आसीन आसं परमासनेऽहं यदाभयो दक्षिणभागदण्डः ।।
ग्रामस्थविप्रामठमागता ये पङ्क्तीकृतास्तत्र तदोपविष्टाः ।।२१।।

शिरोधृतश्रीकरपादपीठमहामहिम्नैव समागतानाम् ।।
अर्थातुराणां शिवराजपुंसां सतीमतिस्तत्र बभूव चित्रम् ।।२२।।

ग्रामे महान्तो यतयोऽत्र सन्ति जनास्तदीयाश्च यतो न कार्यः ।।
उपद्रवोऽनिष्टमहो भवेन्नः कृतो यदीस्यादिह नूनमित्थम् ।।२३।।

योऽतिप्रधानोऽत्र बले भयाय क्षुद्रस्वलोकाददिशत् सुधीः सः ।।
द्वारे दशाश्चान्यमदेव दिक्स्थे प्राचीस्थिते चैष पृथक् जनानाम् ।।२४।।

तिम्माजिकेशवमुखैः प्रभुभिर्मठान्तरायात् प्रधानपुरुषानपरान्निधाय ।।
द्वारे मठस्य हरिपादजसैन्यनाथो मद्दर्शनोत्कहृदयो भयभक्तिनम्रः ।।२५।।

मत्पार्श्वमेत्यादरतो नमन्तं मां स स्तुवन्तं तमहं तदानीम् ।।
सभाव्य संयापितवान् स्मरन् श्रीस्वामिप्रभावं कुतुकी समासम् ।।२६।।

अत्यद्भुतं वचः श्रुत्वा सत्याभिनवभाषितम् ।।
सत्यनाथमहिम्नेतमित्यानन्दं बुधा अगुः ।।२७।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽत्रावसितिं चतुर्दश इतः श्लाघ्येऽभवत् साधुभिः ।।२८।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे चतुर्दशः सर्गः

Rarest Archiver

॥ पञ्चदशः सर्गः॥

स साधुनाथो निजनाथसत्यनाथेज्यपादस्मरणप्रभावम् ॥
भूयो बुधांस्तानवदत्कदाचित् संव्यक्ततद्भक्तिरसार्द्रचेताः ॥१॥

पुर्यां समासीद्विजयाभिधान्यां तद्राजपार्श्वे यवनप्रधानः ॥
फण्याह्वयो भूसुरदेवविद्विट् तद्राट्प्रियः शूरतमो बलाढ्यः ॥२॥

दिदेश राजा विजयाख्यपुर्यास्तंशूद्रराजं शिवराजनामा ॥
यस्तं पराभूय समेहि मां त्वमिति ब्रुवन् प्राज्यवरूथिनीतम् ॥३॥

तत्र स्थिता ये प्रभवः तदा ते सद्वैष्णवाः पत्रमयापयन् माम् ॥
ग्रामे स्थितं सङ्गलिगीप्रसिद्धे कृष्णातटस्थे खलु माघमासे ॥४॥

ग्रामान्तरं यातजवेन दूरं म्लेच्छः समागच्छति विप्रविद्विट् ॥
पराभवार्थं शिवराजनाम्नः प्रपीडयेदेव स वर्त्मगान् वः ॥५॥

इत्याशयज्ञापकपत्रिकां तामवेक्ष्य नाथस्मरणप्रभावात् ॥
भीः केतिबुध्याऽगणयन् तदुक्तिं तत्रैव धीराः स्थितवानभीति ॥६॥

प्रभूतचम्वायुतवाजिराज्या यदा मरीच्याख्यपुरं स आगात् ॥
तदालया ये प्रभवः तदा मामयापयन् पूर्ववदेव वाचम् ॥७॥

तामप्यहं वाचमथागणय्य तत्रावसं ध्यातमदीशपादः ॥
ग्रामं ततोद्वाविपदं स एत्य तस्थौ द्विजद्रोहिजनाग्रगण्यः ॥८॥

सैन्ये स्थितस्तादृश एव तत्र यो म्लेच्छराट् तं स उवाच भोऽद्य ॥
आमन्त्रणं स्वीकुरुतां मदीयमित्थं तदोमित्यवदच्च सोऽथ ॥९॥

दुष्टैः स सम्भूय यदोपविष्टो निजैः सभायामवदन् तदेति ॥
प्रसङ्गसङ्गेन खलाः तदीयाः फण्याह्वयं तं यवनप्रधानम् ॥१०॥

कोह्लापुराख्यः क्षितिदेवलक्ष्मीदेव्याश्रयः सङ्गलिगीपदश्च ॥
यो भूतिमन्मस्करिराट्द्विजानामावासभूः संवसथोऽस्ति राजन् ॥११॥

तद्ग्रामयुग्मं यदि नाशयामो राष्ट्रं भविष्यत्यपविप्रदेवम् ॥
कार्यं तदेतत् प्रथमं तदाह समोपगा सङ्गलिगीविनाश्या ॥१२॥

श्रुत्वा स तुष्टो यवनो बभाषे भानुः प्रतीचीं गतवानिदानीम् ॥
आमन्त्रणं चोद्य ततो विशामः श्व एव सूर्योदयतः पुरा ताम् ॥१३॥

अत्र द्विजाः सन्ति न वा यदि स्युः स्यात् कार्यनाशः सकलाद्विजा हि ॥
मत्यैक्यवन्तो न च संशयोऽदो विचार्य तां तावदिहाञ्जसेति ॥१४॥

विचार्य तस्यानुचराः त्रिपुण्ड्रधरं तदा ब्राह्मणमेकमेव ॥
आलोक्य नश्येदमुनापि कार्यं विप्रत्वजात्या यत एक एषः ॥१५॥

अतो निबद्ध्यो निगडेन विप्रो नो चेद्भवेत् कार्यविनाश एव ॥
इत्थं विनिश्चित्य धरामरं तं तदा बबन्धुः निगडेन दुष्टाः ॥१६॥

Rarest Archiver

अहो तदा सङ्गलिगीस्थितेन स्वस्थात्मनेशाङ्घ्रिग्रहदा न किञ्चित् ।।
बुद्धं तदेतन्न च राम एव बलं तदासीद्गुरुराजहृद्गः ।।१७।।

ग्रामान्तरं मामगतं निशम्य खिन्नाः तदा ये विजयाख्यापुर्याम् ।।
भवेदनर्थोऽयमतीव दुष्टः ते तु स्वतन्त्रा इति निश्चयेताः ।।१८।।

आमन्त्रितोऽन्येन तुरुष्कराजा फण्यांह्वयो भुक्तिकृते कृतं यत् ।।
कृष्णासमीपे परितोऽन्तरीये पदं जगामानुचरैः खलः तत् ।।१९।।

अश्वादवारोहदथैत्य चम्वा कृष्णान्तरीपाङ्कमपेतहेतिः ।।
स सूक्ष्मवस्त्रात्मकवर्ममात्रः फण्याह्वयो दुर्यवनप्रधानः ।।२०।।

तदा मुदान्यो यवनप्रधानोऽभ्यागात्तथैव स्वयमप्यमुं सः ।।
वर्मान्तरालस्थितसूक्ष्मशस्त्रो जिघांसया स्निग्ध इवातिमात्रम् ।।२१।।

मत्स्वामिघातीफणिनामकोऽयमिति द्विषन् दुर्बलभावतो यः ।।
तन्निघ्नवत् साधुरिव स्थितोऽभूत् स्वकार्यवेलां प्रतिवीक्षमाणः ।।२२।।

मिथो यदा तौ परिश्वजाते तयोः तदा फण्यभिधस्य तद्विट् ।।
शस्त्रेण सूक्ष्मेण खरेण कुक्षिं संयोज्य रोषात् समलोडयत् सः ।।२३।।

ततः सफण्याह्वयको मृतः कौ व्यात्ताननोङ्घ्री च भुजौ प्रसार्य ।।
तदीय शस्त्रोन्मथितोवरान्तः स्थितान्त्रमालो निपपात भीष्मम् ।।२४।।

ततोऽभवद्युद्धमतीवभीमं जाज्वल्यमानोत्तमशस्त्रसङ्घैः ।।
तयोर्द्विषोर्भृत्यजनावलीनां मिथः समारूढतुरङ्गमानाम् ।।२५।।

तदा जनाः सङ्गलिगीनिवासाः रणाङ्गणोद्यद्भटराजिशब्दम् ।।
अत्युत्कटं व्याप्तसमस्तकाष्ठं प्रशुश्रुवुः कर्णकठोरमञ्जः ।।२६।।

आरुह्य सद्मानि जवेन तेऽथो रणोत्कटानां समवेक्ष्य हेतीः ।।
देदीप्यमानाः चकिता अभूवन्निदं किमायातमिति ब्रुवाणाः ।।२७।।

मुहुर्मुहुस्तत्र कृते विचारेऽप्यज्ञाततन्म्लेञ्छविशेषकार्यः ।।
भयार्दितोऽहं सुरपेटिकाद्यं स्थलान्तरं प्रापयमर्थजातम् ।।२८।।

शूराश्चिरं ते फणिभृत्यवर्गाः प्रयुध्य युध्ये विजिता विपक्षैः ।।
पराद्रवन् वीतनिजाधिनाथाः स्वप्राणसंरक्षणकाङ्क्षयाशु ।।२९।।

त्रिपुण्ड्रधारी निगडाद्विमुक्तो विप्रः समेत्य प्रणिपत्य सोऽथ ।।
अशेषवार्तामगदद्यदा मां कुतूहलाब्धावभवं निमग्नः ।।३०।।

अहो अहो ज्ञा मदधीश्वरास्तन्माहात्म्यरत्नाकरभावभाजः ।।
को वर्णयेद्यत्स्मरणावलम्बी यतोऽतरं दुस्तरकृच्छ्रसिन्धुम् ।।३१।।

श्रीस्वामिराजस्मरणातिरिक्तैः किं कर्मभिः स्नानजपादिभिश्च ।।
किं तीर्थयात्राचरणेन कृत्यं तत्कार्यमेव स्मरणं मदीशाम् ।।३२।।

सत्याभिपूर्वनवनामजगत्प्रपूज्यहंसस्य गोभिरिति विष्णुपदाश्रयस्य ।।
भूमण्डलप्रथितपण्डितमण्डलीसद्हृत्पुण्डरीकवरषण्डमभूत् प्रफुल्लम् ।।३३।।

Rarest Archiver

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गः पञ्चदशः समाप्तिमगमल्लाल्ये गुणज्ञैर्जनैः ।।३४।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे पञ्चदशः सर्गः

Rarest Archiver

विचक्षणेन्द्रः स विचक्षणान् स्वान् समाचचक्षे पुनरादरेण ।।
निजेश्वराङ्घ्रिस्मरणप्रभावं गुरुप्रकाशाचरणैकशीलः ।।१।।

अकारयं सङ्गलिगीपुरस्थः संवत्सरे पिङ्गलनामधेये ।।
महासमाराधनसाधनोरुनानापदार्थप्रकारान्मुदाहम् ।।२।।

मरीचिपुर्यामभवत् प्रभुर्यः सोऽयापयन् माधवराजनामा ।।
मदन्तिकं स्वं पुरुषं तदाथ सोऽभ्येत्य मामित्यवदत् तदुक्तिम् ।।३।।

नस्थीयतां नूनमहो भवद्भिरिहापरो ग्रामवरोऽभिगम्यः ।।
यद्यत्र वासो भवतामनर्थो भवेत् महान्नोऽत्र विचारणास्ति ।।४।।

मरीचिपुर्यां यवनप्रधानो जानन्नशेषां भवतां स्थितिं सः ।।
एत्यात्र सर्वापहृतीच्छुरास्ते कुधीर्यतो न स्थितिरत्र युक्ता ।।५।।

समीपगा पुण्यतिथिः प्रभूणां प्रभूतसामग्र्यपि निर्मितास्ति ।।
इतःपरं कार्यमिहास्ति किं वेत्यचिन्तयन् तद्वचनं निशम्य ।।६।।

प्रत्यब्दवत्पुण्यतिथौ गुरूणां महासमाराधनमत्र कर्तुम् ।।
यतो न शक्यं सकलद्विजेभ्यो देयं तदामान्नमिति प्रभाति ।।७।।

आमं प्रदायाखिलतण्डुलाज्या गोधूमपिष्टादिपदार्थसार्थम् ।।
अधीशहृद्वासिहरेर्मुदेऽलं ग्रामान्तरं गम्यमतोऽस्मदर्हम् ।।८।।

अहं गमिष्यामि यथानुकूलं महासमाराधनमस्मदीशाम् ।।
तत्रेति निर्धारितवांस्ततोऽहं श्रीस्वामिपादस्मरणं वितन्वन् ।।९।।

(यथानुकूल्यं गुरुराजनाथमहासमाराधनमाचरिष्ये ।।
तत्रेति निर्धारितवान् ततोऽहं श्रीस्वामिपादस्मरणं वितन्वन् ।।९।।

ग्रामान्तरं गन्तुमथो द्वितीयातिथौ सहोमासि सिताख्यपक्षे ।।
स्नात्वा पगायां व्यचरं प्रभाते देवस्थनिर्माल्यविसर्जनं ज्ञाः ।।१०।।

श्रीस्वामिपादस्मरणं चरंस्तद्व्यधां यदा माधवराजनाम ।।
पुनः पुमांसं समयापयत्स्वं स एत्य मामित्यवदत् तदुक्तिम् ।।११।।

सदा प्रमादोऽस्मि तुरुष्कराजपार्श्वे प्रवृत्तिं च निवेदयिष्ये ।।
तदा तदोत्थां स यदातिदुष्टमतिस्तुरुष्काधिपतिस्तदैव ।।१२।।

गम्येत चेत् संवसथाद्भवद्भिर्मुदुक्तितः तर्हि वसन्तु तत्र ।।
महासमाराधनमाचरन्तु तथा भवन्तोऽस्मि सदा प्रबुद्धः ।।१३।।

श्रुत्वा तदुक्तं सकलं प्रतुष्टः स्वाम्यङ्घ्रिकअस्मरणप्रभावम् ।।
शंसन् पुनस्तत्स्मृतिमेव तन्वन् तत्रावसं धैर्यसमेतचित्तः ।।१४।।

राष्ट्रं समन्ताच्छिवराजभृत्याः बाधन्त इत्यादि तदा निशम्य ।।
अयापयं तद्बलगं प्रभूच्चं दत्ताभिधानं प्रतिशिष्यमेकम् ।।१५।।

समेत्य शिष्यस्तमथो ततोऽभिपत्रं समादाय यदा ययौ माम् ।।

Rarest Archiver

आसीत् प्रहर्षोऽस्मदधीश्वराणामाराधनं स्यादिति वीतविघ्नम् ॥१६॥

कृष्णाप्रतीरे विमले विशाले महासमाराधनमस्मदीशाम् ॥
आरभ्य पुष्ये दशमीदिनेऽहं नद्यां व्यधां मज्जनपूर्वकृत्यम् ॥१७॥

आरब्धवान् देववरोपरिष्टिनिर्माल्यमुद्धर्तुमहं (निषण्णः)तटिन्याम् ॥
यदा तदागुः शिवराजभृत्याः युक्ता वराश्वद्विसहस्रचम्वा ॥१८॥

तान्वीक्ष्य लोकान् परतीरसंस्थान् दत्ताभीपत्रा यदिहागतास्तत् ॥
छन्नैव सर्वं ग्रहणाय नस्तत्किं कार्यमित्यासमितातिचिन्तः ॥१९॥

अनुद्धरन् देववरोपरिष्टिनिर्माल्यमाप्तातिभयः तदैव ॥
जोनालसस्योरुकुलान्तरेऽहमयापयं देवसमस्तपेटीः ॥२०॥

स्मरन्नधीशां चरणौ यदाहमयापयन् ता अवनाय पेटीः ॥
तदावतेरुः परतीर एव तुरङ्गमेभ्यः शिवराजलोकाः ॥२१॥

तान् वीक्षमाणस्य बभूव धैर्यमस्मान् गृहीतुं त इहागताश्चेत् ॥
तेषां परे रोधसि किं नु कृत्यं स्थित्येत्थमालोचयतो ममाहो ॥२२॥

तान् किङ्करा ऊचुरहो इदानीं दृष्टाबलीवर्दगणा अदभ्राः ॥
इतो विदूरे बहुधान्यभारधरामरीचाख्यपुराभियानाः ॥२३॥

द्रुतं गतं चेत् स्ववशा भवेयुर्गावस्त इत्याशु निशम्य वाचम् ॥
आरुह्य तेऽश्वान् शिवराजदूतास्तीरं न आयुः सहसा तदैव ॥२४॥

इमेऽस्मदर्थं शिवराजलोकाः अप्यागताश्चाः शनकैः प्रतीरम् ॥
परं समेष्याम इति स्थिताः प्राक् कृत्यं विलम्बेन किमत्र नोऽद्य ॥२५॥

इत्थं धिया यान्ति जना इमेऽत्र ध्रुवं खला इत्यवबुध्य भीतः ॥
समस्मरं श्रीकरचारुनाथपादाम्बुजाते मनसा तदाहम् ॥२६॥

तदैव लिङ्गाजिगणेशनामा प्रभुः स्वसूनुं समयापयन् माम् ॥
अभ्येत्य मां स प्रणिपत्यवाचमुवाच पित्रा समुदीरितां सः ॥२७॥

वयं भवद्दर्शनकाङ्क्षिणोऽलं तथापि सम्प्रत्यवकाश ईषत् ॥
न नोऽस्ति कार्यं महदस्ति तस्यावसान एष्याम इतीह सत्यम् ॥२८॥

आकर्ण्य तद्वाचमहं तदातिकुतूहलेतः पतिपादयोर्नः ॥
स्मृतेः प्रभावात् भयहानिरासीदिति स्मरं नासमतीवतुष्टः ॥२९॥

अथैत्य नानाविधधान्यभारवहान् बलीवर्दगणांस्तदीयान् ॥
विजित्य पुंसः पुनरागुरत्र प्रगृह्य भारान् शिवराड्जनांस्तान् ॥३०॥

समेत्य मां विट्ठलनामकाद्यान् प्रभूत्तमान् सन्नमतो विलोक्य ॥
अत्राद्य भोक्तव्यमहो भवद्भिरित्यूचिवांस्तान् सकलानहं हि ॥३१॥

ओमित्यवोचन् प्रभवस्ततोहं श्रीकृष्णवेण्यामवगाह्य भूयः ॥
मध्याह्नकाले रघुनाथपूजां तत्साधनाग्र्यैर्व्यचरं महेन ॥३२॥

Rarest Archiver

अथोपविष्टेषु महीसुरेषु श्रीकृष्णवेण्यामवगाह्य भुक्त्यै ।।
प्रभुष्वपि प्राप्तमहासुखेषु प्रायादुदन्तो जनतामुदन्तः ।।३३।।

भारानपाहृत्य ययुः समस्तधान्यादिकानां शिवराजलोकाः ।।
श्रुत्वेति वार्तां समरीचिनाथो म्लेञ्छो रुषायान्निकटं रणाय ।।३४।।

श्रुत्वेति वार्त्तां प्रभवो विसृज्य भुक्तिं समारुह्य निजाश्ववर्यान् ।।
ससैनिकास्ते समराय तूर्णां तमभ्ययुर्म्लेञ्छजनाधिनाथम् ।।३५।।

महासमाराधनभूतलस्य क्रोशार्धदूरे यवनेन तेषाम् ।।
महाट्टहासादिविभीषणोऽभूद्रणो महान् विस्मयकृज्जनानाम् ।।३६।।

महादरेतोऽपि महात्मनाथमहाप्रसादादभयं भवेन्नः ।।
इत्थं विनिश्चित्य तदा स्मरंस्तान् महासमाराधनमाचरं ज्ञाः ।।३७।।

प्रत्यद्धवद्धिप्रचया विचित्रस्वाद्वन्नभक्षादिपदार्थसार्थान् ।।
भुक्त्यै द्विजानां परिवेषयन्ति पुरा तदा सत्कदलीदलेषु ।।३८।।

शूरास्तदारूढतुरङ्गतुङ्गावज्राभवर्मान्तरितस्वगात्राः ।।
अमर्षताम्रातततनेत्रभाजो दन्तैश्च दन्तानतिघर्षयन्तः ।।३९।।

ते कुन्तकुद्दालकुठारखड्गैः शरैरपारैरपरायुधैश्च ।।
परस्परं रात्रिचरा इवालं व्यताडयन् केसरिनादनादाः ।।४०।।

तदीयनानाविधयन्त्रजन्यरणोत्कटध्वानमतीवभीष्मम् ।।
अश्रौष्म कोलाहलमप्यहो ज्ञाः सर्वे वयं सन्ततदूरदेशम् ।।४१।।

दक्षेषु कामं परिवेषयत्सु श्रुण्वन्त एवोरुरणोत्थरावम्(नादम्) ।।
अभुञ्जताकण्ठतटं तदारं सर्वेऽपि नाथस्मरणप्रभावात् ।।४२।।

प्रयुध्य शक्त्या शिवराजलोकाः पराजितास्तेन तुरुष्कराजा ।।
पलायनोद्योगयुता बभूवुर्जयेन तुष्टश्च मरीचिपालः ।।४३।।

पलायमानाननुगम्य सर्वान् सँहृत्य तान् भारगणान् प्रगृह्य ।।
एष्याम इत्थं मतिमातातान मरीचिनाथोऽथ तुरुष्कसिंहः ।।४४।।

तानन्वियादेष यदि स्म दुष्टो व्याजादतस्तर्हि यतीश्वराणाम् ।।
महासमाराधनतत्पराणामध्वस्थितानां स्म भवेदनर्थः ।।४५।।

पुरैव तद्द्रोहमतिः पुनश्च महासमाराधनतत्परांस्तान् ।।
दृष्ट्वा यतीशानलमेष दुष्टः प्रपीडयेदेव न संशयोऽत्र ।।४६।।

तदेति निश्चित्य हृदाथ योगं प्रकल्प्य तं म्लेञ्छ पतिं बभाषे ।।
प्रभूत्तमो माधवराजनामावरुह्य सप्तेरिति दुष्ट बुद्धिम् ।।४७।।

पलायमानद्विषतां तवार्हं नैवानुयानं जयिनो यतस्तैः ।।
बलं चतुर्धा प्रविभज्य तत्र तत्राभितः स्थापितमस्ति दुष्टैः ।।४८।।

जितानिव स्वान् कपटेन तेऽलं प्रदर्श्य नः स्वानुगतानवेक्ष्य ।।

Rarest Archiver

चम्वा तयावृत्य निहन्तुमेवोद्यतास्ततो नानुगतिस्तवार्हा ।।४९।।

श्रुत्वेति वाणीं समरीचिपालो विश्वस्य तां स्वां नगरीं जगाम ।।
आयन् पुनस्ते शिवराजलोकाः तदह्निरात्रावथ मत्सकाशम् ।।५०।।

तत्र स्थिता ये प्रभवः समेत्य समानमन् मामिति ते ब्रुवन्तः ।।
भवत् प्रसादादरिवर्गमद्य जित्वागतास्मो वयमत्र नाथाः ।।५१।।

तदा निशायां विनिमज्य नद्यां मदाज्ञया ते प्रभवो निषण्णाः ।।
तृतीयपङ्क्तौ मुदिता अतीव भुक्तिं व्यधुः सङ्गरकृच्छ्रभाजः ।।५२।।

महासमाराधनमेतदापत्परम्परासंहतिपूर्वमासीत् ।।
यत् संस्मृतेस्तद्गुरुराट्पदाब्जस्मृतिप्रभावं भुवि वर्णयेत् कः ।।५३।।

इति श्रीसत्यनाथेन्द्रयतिराजप्रशंसनीम् ।।
कृतिनो भारतीं श्रुत्वा प्रीतिमापुरतीव ते ।।५४।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
श्लाघ्ये तद्गुणसारलुब्धकविभिः सर्गोऽभवत् षोडशः ।।५५।।

श्रीसत्यनाथमाहात्म्यरत्नाकरे षोडषः सर्गः

Rarest Archiver

॥ सप्तदशः सर्गः॥

भूयोऽनुभूतं श्रुणुतास्मदीशस्मृतिप्रभावं मदुदीर्यमाणम् ॥
इति ब्रुवाणो गिरमूचिवांस्तान् बुधान् स सत्याभिनवः सभायाम् ॥१॥

आसन् यदा पिङ्गलनामकेब्दे वासं चरन् सङ्गलिगीपुरेऽहम् ॥
तदाधिपत्यं समवाप्य कश्चित् म्लेञ्छोमरीच्याख्यपुरीं समायात् ॥२॥

सशिश्ननामायवनप्रधानो वसन् मरीच्याख्यपुरे तदीशः ॥
स्थितिं मदीयां सकलां निशम्य गृहीतुमुद्युक्तमना न आसीत् ॥३॥

आकर्ण्य तद्दुर्मतिना ततोऽहमालोचितं कार्यमिनप्रसादात् ॥
तत्रत्यसाधुप्रभुलोकवत्क्रादगां पुरीं सङ्गलिगीं विसृज्य ॥४॥

एतत्तुरुष्काधिकृतं विसृज्य देशं पराधिष्ठितमेवदेशम् ॥
गच्छामि चेत् क्षेममलं ध्रुवं मे नातोन्यथेत्येव विचार्य तत्र ॥५॥

तीर्त्वाशु कृष्णां शिवराजदेशे ग्रामं गतोऽहं डिगृजीति सञ्ज्ञम् ॥
तत्रैव वासं कतिचिद्दिनानि व्यधां बुधास्तत्खलसाध्वसेन ॥६॥

अशेषमेत्तत् खल आकलय्य नेष्टं ममासीदिति चित्रयानः ॥
तत्स्वेष्टलाभाय हृदा विचार्य सङ्कल्पयामास तदा यथोगम् ॥७॥

स कैतवेनैव समीपवर्तिप्रभूत्तमान् प्रत्ययपूर्वकं सः ॥
मध्यस्थभावोपगतान् विधाय मदन्तिकं यापयति स्म पत्रम् ॥८॥

यूयं महान्तो यतयः प्रसिद्धाः लोके भवद्द्रोहकराः क एव ॥
गतौ पुरं सङ्गलगीं विसृज्य हेतुं न पश्याम्यपरत्र नूनम् ॥९॥

मत्तो भयं मा भवतां न तादृगहं भवद्दासगणे हि गण्यः ॥
किमब्रुवन् वा विपरीतमग्रे के के मृषातो न विचारणोऽत्र ॥१०॥

मध्यस्थभावे भवदङ्घ्रिदासाः प्रभूत्तमाः सङ्गलिगी भवद्भिः ॥
आगम्यतां नः कुशलाय सत्यं माभूद्भयं मद्रवतां यतीशाः ॥११॥

इत्याशयज्ञापकपत्रिकां तां समीक्ष्य तद्भावमजानताञ्च ॥
पत्राणि सान्त्वोक्तिनिवेदकानि तुष्टस्तदा सङ्गलिगीं समागाम् ॥१२॥

विश्वासयन् सङ्गलिगीस्थितं मां छद्मी यथोक्तं कतिचिद्दिनानि ॥
तूष्णीं स्थितोऽस्मद्ग्रहणाय यत्नं ततो करोच्छिश्नपदः स दुष्टः ॥१३॥

उल्लङ्घय कृष्णामपरत्रयातुं यो यः समासीत् पथि तत्र तत्र ॥
अस्थापयच्छिश्नपदाभिधेयस्तुरङ्गपञ्चोत्तरविंशतिं सः ॥१४॥

सरस्वतीपूजनवासरेषु श्रुत्वा मुदं तं तमुदन्तमार्याः ॥
चिन्तां दुरन्तां गतवांस्तथैव सरस्वतीपूजनमाचरं स्म ॥१५॥

स्मरन् प्रभुश्रीचरणौ सरस्वत्यर्चादशम्यां विजयोपनाम्न्याम् ॥
समाप्य रात्रावपरत्र गन्तुं तीर्त्वा नदीमुद्यत आसमग्र्याः ॥१६॥

Rarest Archiver

निर्गम्यते चेदमुतोऽधिनाथाः महाननर्थो भवतां ध्रुवं स्यात् ॥
ते म्लेञ्छभृत्याः प्रतिवर्त्म सन्ति सज्ञा इदानीं भवदर्थमेव ॥१७॥

ग्रामे स्थितावप्युरुभीतिरेव तथापि वोऽन्यत्र गतिर्न चार्हा ॥
विचार्यतां कश्चिदिहैव योग इत्यब्रुवन् मां सकला मठीयाः ॥१८॥

पुनः पुनस्तैरिति वारितोऽलं रात्रावहं पुस्तकमीक्षमाणः ॥
आसं यदा ते निजसद्म जग्मुः विश्वस्य मां धूममुखामठीयाः ॥१९॥

यामात् परं बोडपदादिकश्रीनिवासनामानमवोचमित्थम् ॥
ज्योतिर्विदं किं गमनं प्रशस्तमुताप्रशस्तं वद भाति किं ते ॥२०॥

तदोभयत्रापि सबाधकानि पश्यन् शिलावत् प्रतिवाक्यशून्यः ॥
तस्थावभूद्धीरिति नाथपादस्मृतिर्गति नूनमतोपरा न ॥२१॥

अथो कृतस्वामिपदाम्बुजातस्मृतिप्रभावेन सति प्रतीते ॥
योगे तदा सङ्गलिगीपुरीपं आह्वाययं शिष्यजनेन तूर्णम् ॥२२॥

आकारितो ग्रामपतिस्तदागात्तमब्रुवं संप्रति कृष्णवेणीम् ॥
तीर्त्वा मयाग्रे गमनीयमस्ति भवान् सहायो भवता ध्रुवंन्नः ॥२३॥

नात्रास्ति नद्यास्तरणायनौर्नो यत्रास्ति शिश्नाह्वयकारितानि ॥
महान्ति सन्ति प्रतिबन्धकानि तथात्र नद्यां जलमस्ति निम्नम् ॥२४॥

आनीयतामत्र बृहद्घटालिस्त्रिंशच्च खट्वा दृढरज्जवोतः ॥
खट्वासु बद्धा सुदृढं घटाभिर्निक्षिप्य भारां स्तटिनीं तरामः ॥२५॥

(मदी)श्रुत्वेरितं सङ्गलिगीपतिस्थाः(पुरीयः)
(श्रुत्वा) सर्वास्तथानीनयदेश(तिस्म) सङ्घः ॥
ततो निबद्धाः पटलैर्घटानां खट्वा मठीयैः क्षणमात्रतोऽलम् ॥२६॥

स्मरन्नधीशाङ्घ्रिसरोजयुग्ममाभीः तरीतुं तटिनीं समस्तान् ॥
प्रगृह्य भारान् समगां यदा तां श्रीकृष्णवेणीमभवन्निशीथः ॥२७॥

दोर्भ्यां तरीतुं तटिनीं यदादावेकः प्रविश्याम्बु जगाम पद्भ्याम् ॥
तत्कण्ठदघ्नं सलिलं तदासीत्तथापि सोऽगात्पुरतः पदाभ्याम् ॥२८॥

तस्मिंस्तथा गच्छति तोयमासीत् क्रमादुरोमात्र(दघ्न)मथो सहृष्टः ॥
गच्छन् पदाभ्यां परतीरमाप्य प्रोवाच वाचं सकलानिति स्म ॥२९॥

विनैव खट्वाः सकलान् प्रगृह्य भारंस्तरीतुं तटिनी पदाभ्याम् ॥
शक्यैव यावत्परतीरमत्र नोरःप्रमाणादधिकं कबन्धम् ॥३०॥

विनैव खट्वाः सकलान् प्रगृह्य भारान् मठीया अतरन्नदीं ताम् ॥
अथ प्रहृष्टा गुरुपादपद्मस्मृतिप्रभावेन बुधास्तदाहो ॥३१॥

अतारयन्मामथ वाहकास्तामारूढदोलं शिरसा तदोढ्वा ॥
श्रीस्वामिपादास्मरणप्रभावाच्चित्रं तदानीमतिमात्रमासीत् ॥३२॥

Rarest Archiver

प्रातर्विचारेति गभीरतोयासर्वत्र कृष्णातटिनी कथं सा।।
मह्यं ददौ वर्त्म बुधा अहो तत्किं वर्णनीयोऽस्मदिनप्रभावः ।।३३।।

कृष्णाय कृष्णासमदात्स्मृतिं प्रागिति श्रुतं भागवतादिके यत् ।।
ग्रन्थेन चित्रं जगदीश्वरत्वात् कृष्णस्य गोपीजनवल्लभस्य ।।३४।।

तद्दासनाथाङ्घ्रिसरोजयुग्मस्मृतिप्रभावेन भृशं प्रसन्ना ।।
श्रीकृष्णवेणीपदवीमदाद्यत् मह्यं तदेतत् भुवि चित्रचित्रम् ।।३५।।

श्रीस्वामिपादाब्जरतस्ततस्तां तीर्त्वा नदीमाहिमपाददृष्टि ।।
क्रोशं त्रयं तच्छिवराजराष्ट्रे रात्रौ पुरोऽहं गतवान् जवेन ।।३६।।

यान् वारूणीनामनदीं ततोऽहं तदन्तराले शयनं सशिष्यः ।।
व्यधामधीशाङ्घ्रिसरोजयुग्मस्मृतिप्रभावेन विधूतभीतिः ।।३७।।

आकर्ण्य सर्वं यवनोऽथ शिश्नपादो न कार्यं समभून्ममेति ।।
खिन्नो भृशं सङ्गलिगीमुपेत्य विप्रान् बबाधे खलु तत्र सर्वान् ।।३८।।

तन्मास एवैष ममार युद्धे छिन्नोत्तमाङ्गः शिवराजपुम्भिः ।।
दुर्मार्गवर्ती यवनप्रधानो लभेत कं कः सुरभूसुरध्रुक् ।।३९।।

इत्थं श्रीगुरुचरणस्मृतिप्रभावं श्रीसत्याभिनवयतीरितं सभायाम् ।।
सन्तुष्टा अखिला बुधाः पुनः पुनस्तं श्रोतुं ते रणरणिकायुजः समासन् ।।४०।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गः सप्तदशोऽभवत् क्षितितले लाल्येन सूर्यैर्जनैः ।।४१।।

श्रीसत्यनाथ माहात्म्य रत्नाकरे सप्तदशः सर्गः

Rarest Archiver

||अष्टादशः सर्गः||

अधीशमाहात्म्यमसौ बुधांस्तान् सुधायमानं पुनरभ्यधत्त ||
कृतार्थवर्यः पुरुषार्थहेतुं समस्तपापौघवनालिदावम् ||१||

क्षेत्रं कदाचित् समगामहं तद्वरापगाजायत यत्र कृष्णा ||
वेणीपदाद्या अपि पुण्यनद्यो महाबलेशाभिधया प्रसिद्धे ||२||

यत्र व्यजायन्त वरापगास्ताः तत्र प्रवाहा अणवो यदासाम् ||
मङ्क्तुं न शक्या निकटेऽग्रभागे कुण्डः कृतस्तज्जनमज्जनार्हः ||३||

श्रीकृष्णवेणीप्रमुखापगानां झराम्बुभिर्गोमुखवर्त्मनेतैः ||
विभ्राजमानो विततः समेतप्राकार आस्ते ह्यधुनापि यत्र ||४||

प्रविश्य तत्क्षेत्रवरं ततोऽहं दिवा चतुर्थप्रहरान्त्यभागे ||
कृष्णादिकानिर्झरवारिकुण्डसन्दर्शनं कर्तुमागात् तदङ्कम् ||५||

आरब्धवान् तन्नमनं यदाहं प्रदध्मतुर्द्वौ धवलोरुशङ्खौ ||
द्वौगायकौ तालवरं चरन्तावगायतां चाशनकैस्तदालम् ||६||

दरादिनादोऽरिदरावहोऽलं खलस्य तस्य श्रुतिकोटरे सः ||
विवेश तत्स्वान्तनितान्तभेदं कुर्वन्निवाहो विबुधास्तदानीम् ||७||

तत्कुण्डसालान्तर एव योऽलं विशालशालं निलयं विधाय ||
व्यधादवाची दिशि शैवदीक्षो जटाधरो भस्मधरो निवासम् ||८||

नाना युधध्रैर्बलिभिर्जटाध्रैः भयङ्करैर्भृत्युजनैः समेतः ||
भजन् गुरुं सङ्करमायिराजं स्वं मन्यमानः परमेव हंसम् ||९||

दुष्टः ततोऽन्याभ्युदयासहोऽसौ मदन्तिकं यापयति स्म भृत्यम् ||
युष्मान् समाह्वाययति प्रभुर्नः तदङ्कमायान्त्विति सोऽवदत् माम् ||१०||

जटी स दुष्टः परुषोक्तिभाषी क्षमैव धार्या पुरतो भवद्भिः ||
अनागतौ बाधकमाचरेत् यत् गन्तव्यमेवास्य सकाशमाशु ||११||

तदेति विप्रैः समुदीरितां गां निशम्य तद्ग्रामगतैर्यदासम् ||
गत्वा तदभ्याशमवस्थितोऽहं तूष्णीं तदासाविति वाचमूचे ||१२||

पुरातनः सङ्करनामकार्यो जगद्गुरुर्मध्यभवश्च मध्वः ||
स तस्करः त्वञ्च कुतः तवाय माण्डम्बरः शिष्यजना इमे च ||१३||

इत्यादि दुर्भाषितमस्य तत्र श्रृण्वन् स्मरन् स्वामिपदाम्बुजाते ||
तदाददानः प्रतिवाक्यमस्मै तुष्णीमतिष्ठं क्षमया समेतः ||१४||

तत्क्षेत्रगः कश्चिदमुं जटाध्राधिपां द्विजो वाचमुवाच तूर्णम् ||
स्नात्वात्रतीर्थे निकटं तमेव आगत्य वाचं श्रुणुयुस्त्वदुक्ताम् ||१५||

इतीरितोऽसौ जटिराड्द्विजेन शीघ्रं समायां त्विति गामुदीर्य ||
मां प्रेषयामास ततस्तदेत्य तीर्थं ततोऽहं निरगाममज्जन् ||१६||

Rarest Archiver

प्राकारतोऽहं निरगाममङ्क्त्वा यदा तदागत्य तदेकदूतः ॥
रुरोध दुष्टः परिघं निधाय द्वारान्तरेऽनिर्गमनानुकूलम् ॥१७॥

अभर्त्सयन् मामिति तस्य दूतः स्नात्वा समायां तु भवन्त आशु ॥
भूयो मदभ्याशमितीशवाक्यं विधीयते नो भवतो निहन्मि ॥१८॥

ततः स्मरन् श्रीकरनाथपादौ विधायकं तत्परिघादधोऽहम् ॥
बहिर्गतः स्वामिवराङ्घ्रिपद्मस्मृत्या स तूर्ष्णीं स्थितवानहो तत् ॥१९॥

सनिर्दयो मां परिघेण हन्याद्रुषा तदा प्राणवियोग एव ॥
प्राप्तो भवेत् सोऽपि विलुप्त आसीदधीशपादस्मरणेन नूनम् ॥२०॥

त्यक्त्वा स मां सूर्यपुटध्रमेत्याथाकृष्य तत्सूर्यपुटं निनाय ॥
नाथान् स्मरन्नेत्य महाबलेशदेवालयं तत्पतिमानमं ज्ञाः ॥२१॥

मया स्थलं संप्रतिपन्नमेकं गत्वावगाहं विरचय्य रात्रौ ॥
कार्या सुरार्चेति यदा व्यधायि मनः तदा कश्चन मां समागात् ॥२२॥

शास्त्री स मां ग्रामगतो बभाषे देवार्चनं न क्रियतां भवद्भिः ॥
दुष्टोन्यथा चेज्जटिलो महान्तमुपद्रवं वो विदयो विदध्यात् ॥२३॥

महाबलाधीश्वर देवभाण्डषण्डं यमादाय निजालयेऽयम् ॥
पाकादिकं कारयति स्वकीयैः निरङ्कुशोनन्यभयः खलोऽलम् ॥२४॥

तद्देवकाष्ठौघमशेषमेषः स्वीकृत्यविष्ट्यै जटिलप्रबर्हः ॥
दुष्टो द्विजैर्ग्रामगतैः स्वगेहमकारयद्वाच्यमहो किमस्ति ॥२५॥

भवादृशानामपि यश्चकार पीडामहो तस्य न कश्चिदस्ति ॥
शिक्षाकृदस्माक्रियतां न चाद्या नूनं सुरार्चा खिल विद्धिरित्थम् ॥२६॥

ततो विचिन्त्य स्मरणे कृतेऽलं का भीरधीशाङ्घ्रिसरोजयोर्नः ॥
इत्थं विनिश्चित्य तदानिमज्य श्रीदेवपूजामचरं स्मरंस्ते ॥२७॥

तालाम्बुजानादनपूर्वमञ्जः कृतेऽपि रात्रावमरार्चने सः ॥
तूर्ष्णीं समासीदधिनाथपादस्मृतिप्रभावादति चित्रमेतत् ॥२८॥

श्रीरामपूजां विचरय्य रात्रौ प्रदक्षिणाष्टाङ्गयुतप्रणामान् ॥
व्यधां मुहूर्त्ता अभवन् तदाष्टौ तदैव मत्पार्श्वमवापकश्चित् ॥२९॥

महाबलाधीश्वरलिङ्गपूजाक्लृप्तो य आसीद्धरिपादजो माम् ॥
एकेन विप्रेण तदैत्य दृष्टं स्वप्नं प्रवक्तुं तमचोदयत् सः ॥३०॥

तच्चोदितो भूविबुधः स ऊचे मां वाचमित्थं स महाबलेशः ॥
स्वप्नेऽभ्यधत्त प्रमथाधिनाथः इति स्फुटं स्वार्चकमेनमार्याः ॥३१॥

मां द्रष्टुमेवेह समागता मे भक्ता यतीशा जटिलः खलोयम् ॥
न मानयामास यतीश्वरांस्तान् प्रपीडयामास पुनः प्रमत्तः ॥३२॥

अहं परश्वश्चरणान् प्रगृह्याकृष्याञ्जसैषां परिपोथयिष्ये ॥

Rarest Archiver

इत्थं त्वमाचक्ष्वगतो यतीशान् मदीरितं सांप्रतमेव वाक्यम् ॥३३॥

श्रुत्वाद्भुतं स्वप्नमुदीरितं तं निगद्य साध्वित्युरुकौतुकोऽहम् ॥
तौ यापयित्वा शयितः समासं स्मरन्नधीशस्मरणप्रभावम् ॥३४॥

आर्कोदयं श्रान्तिवशातिनिद्राक्षतं तदास्वप्नमहं मदीशाः ॥
द्वे चामरे चन्द्र मरीचिगौरे प्रादुः प्रसन्नाब्जमुखा ममेति ॥३५॥

स्वप्नोत्थितः स्वप्नमथ ब्रुवाणः प्रातर्द्विजान् विस्मयवान् स्मरंस्तम् ॥
ईशाङ्घ्रि कञ्जस्मरणप्रभावं व्यधामहं शौचमुखं स्वकृत्यम् ॥३६॥

अधीशपादस्मरणप्रभावसञ्जातसद्बीर्जटिराट् खलोऽपि ॥
अयापयत् सूर्यपुटं स्वनीतं कुतूहलं प्रापि तदा समस्तैः ॥३७॥

यदावगाहार्थमुपेत्य कृष्णाकुण्डं प्रविष्टोऽधिपपादपद्मे ॥
स्मरंननिष्टालिहरे तदासौ मां वाचमूचे जटिलः सुबुद्धिः ॥३८॥

प्रधानकुण्डे स्थजले भवद्भिर्निमज्यतां कुण्डमिमं विसृज्य ॥
पङ्कावृतो लोक विलोडितो यत् मत्तो भयं मा भवतामितीह ॥३९॥

यदावगाहं कृतवान् तदाहं धूमाभिधग्रामगतेन वार्ताम् ॥
इमां निशम्य प्रहितास्तदागुः शिवाख्यराड्बन्धुवरेण दूताः ॥४०॥

ततो मुदाहं रचितः स्वकृत्यः सद्मैत्य कृत्वा रघुनाथपूजाम् ॥
यदार्चयं तां मुहुरेत्य कृष्णां प्रदध्मतुर्द्वौ धवलाब्जराजौ ॥४१॥

श्रुत्वा जटी शङ्खरवं स तूर्णं गृहाद्बहिर्द्वारमुपेत्य तत्र ॥
स्थितोऽर्चनं तत्समवेक्ष्य दूतानारूढसालांश्च बहूंश्चुकोप ॥४२॥

सोऽत्रागतं श्रेष्ठनरं बभाषे रोषेऽति निन्दन् किमिहागतोऽसि ॥
यतीश्वरैर्मे कलहोऽस्ति किं रे तथापि किं स्याद्भवतो समाधिः ॥४३॥

इत्थं तमुक्त्वापरुषोक्तिजालैः निन्दन् शिलाजालमवाक्षिपत्सः ॥
अस्मासु नाथस्मरणप्रभावादगामतद्योगमगारमाशु ॥४४॥

दिव्यान्नभक्षाज्यमुखैरथार्थैः शतानि पञ्चावनि देवतानाम् ॥
तृप्तानि तन्वन्नचरं सुभिक्षामहं च तत्क्षेत्रपतीशतुष्ट्यै ॥४५॥

तदह्नि तत्क्षेत्रमथो विसृज्य प्रणम्य तत्क्षेत्रपतिं महेशाम् ॥
तदाज्ञयैत्यावकलाभिधानं ग्रामं व्यधां वासमहं क्षपायाम् ॥४६॥

शिवाख्यराजानुगतो विराटपुरीपतिर्दत्तपदाङ्कितो यः ॥
निशम्य वृत्तान्तमिमं रुषाश्चानयापयत्तज्जटिनिग्रहाय ॥४७॥

प्रचोदितो वैष्णवदत्तनाम्ना प्रभूत्तमेनानुज एव तस्य ॥
तत्क्षेत्रगं मामनुमन्यमानः क्षेत्रं ययावश्वशतद्वयेन ॥४८॥

यदह्नि तत्क्षेत्रवरात् पुरोगां तदह्नि दत्तानुज एत्य तत् सः ॥
तत्रानवेक्ष्याथ गतं ततो मां श्रुत्वा श्रमेतः समुवास तत्र ॥४९॥

Rarest Archiver

ततः परस्मिन् दिवसे प्रभाते दत्तानुजः कुण्डवरे निमज्य ।।
तरङ्गिणीपूरयुते फलाद्यं जघास पूर्वे ह्युपवासकृद्यत् ।।५०।।

ततो जटाधारिजिनापमानं सकर्तुकामः सह भृत्यवर्गैः ।।
तावद्धुनीनिर्झरचारुकुण्डं समेत्य तोयं पिबति स्म पेयम् ।।५१।।

भोक्तुं निषण्णाः पृथुशालिकायां पत्रालिसंस्थापितमन्नमग्रे ।।
आसन् जटाध्रासमगात्तदङ्कं तदैव दत्तानुजदूत एकः ।।५२।।

रोषाभिवृध्या कलहागमाय तेषां द्विषां स्वप्रभुणाभिनुन्नः ।।
दूतोजटाधारिजिनालिमध्यं पत्राणसम्बद्धपदो विशत् सः ।।५३।।

तं तादृशं वीक्ष्य जटाधरास्ते निन्दन्त एनं परुषोक्तिजालैः ।।
कोपातिताम्राक्षियुताः निहन्तुं चक्रुर्विकोशं खरशस्त्रजालम् ।।५४।।

तद्व्याजतो दत्तपदानुजो यो जटाधरानेत्य रुषा बभाषे ।।
कथं गृहे स्थापयतातिमत्ता महाबलेशामरभाण्डषण्डम् ।।५५।।

प्रभृह्य काष्टानि महेश्वरस्य कृतं कथं गेहमहो भवद्भिः ।।
अत्रागताः साधुजनाधिनाथाः प्रपीडिता भिक्षुवराः कथञ्च ।।५६।।

जटाधराणां भवतां समीपे रामाः किंमर्थं वदतोत्तरं मे ।।
यूयं बलात् सम्प्रतिकस्य पुंसो दुष्टाः कुचेष्टा निरता इहेति ।।५७।।

उक्त्वेति रोषारुणभीषणाक्षः तान् बन्धयामास सकिङ्करैः स्वैः ।।
जटाधरान् पाशवरेतिदीर्घतन्त्यां बलीवर्दगणानिवाहो ।।५८।।

प्रवेशयामास महामहीध्रे गोमन्तसञ्ज्ञे परदुर्गऽमेलम् ।।
कारालयं तान् जटिलानशेषान् निबध्य पाश्चात्यकरांस्ततः सः ।।५९।।

अधीशपादस्मरणप्रभावं चित्रं प्रवक्तुं न बुधाः समर्थाः ।।
यत्तत्स्मृतेरेव विपद्धतिर्नो विरोधिनामापदतीव चित्रम् ।।६०।।

इति वदन्तममुं गुरुराजसच्चरणसंस्मरणस्य महादरात् ।।
बुधजना महिमानमतीव ते कुतुकिनो नुनुवुर्बहुधादरात् ।।६१।।

श्रीसत्याभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्यायुजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गोऽष्टादश आययाववसितिं लाल्येन सूयैर्जनैः ।।६२।।

इति श्रीसत्यनाथमाहात्म्यरत्नाकरे अष्टादशः सर्गः

Rarest Archiver

।। एकोनविंशः सर्गः।।

यस्याभिधानं रुधिरादिभागमुद्गारिशब्दान्तिममत्र वर्षे ।।
अधीशधामप्रकटं यदासीत् कदाचिदूचे स बुधान् यतीशः ।।१।।

क्षेत्राणि तीर्थानि चरन्नवन्यां श्रीधर्मपुर्याह्वयपुण्यभूमिम् ।।
प्रयातु कामं प्रथमं पथिज्ञाः भागापुरं यामि पुरा कदाचित् ।।२।।

नाथप्रसादात् रघुनाथपूजा चित्रैर्विचित्रैः सुमनः फलाद्यैः ।।
अभूतपूर्वा समभून्नगर्यां वरार्हणैस्तत्र बहुन्यहानि ।।३।।

हरिं तदेष्यं तमहं गुरुं तं निशम्य भागानगरं विसृज्य ।।
श्रीधर्मपुर्याह्वयपुण्यभूमिं प्रातिष्ट आर्या ननु शुक्रमासे ।।४।।

न चोचितं ग्रीष्मपदेऽत्र मासे दिवाप्रयाणं जनतापदेऽलम् ।।
स्यात् तत् क्षपायां यदि तर्हि तापो न स्याच्च सौख्यं परमं भवेन्नः ।।५।।

इत्थं विनिश्चित्य तदा प्रभूच्चप्रदत्तभृत्यैः कृतवान् प्रयाणम् ।।
यदा रजन्यां प्रथमप्रयाणदिने ममासीदधिको हि तापः ।।६।।

तातप्यमानो रजनीं कथञ्चिन्नीत्वा परेऽह्ना रचितस्वकृत्यः ।।
आसायमञ्जः कृतवान् प्रयाणं निश्येव पूर्वाहवदग्रतोऽहम् ।।७।।

तत्रापि रात्रावधिकस्ततोऽभूत् तापस्तदाश्चर्यमभूत् तदेति ।।
तापोपशान्त्यै रचिते प्रयाणे रात्रौ कथं मे परिताप आसीत् ।।८।।

एवं तृतीयादिदिनेष्वभून्मे मया प्रतीतो न च तत्र योगः ।।
अबुद्धतापोपशमप्रकारस्तथैव तापाभिहतः पुरोऽगाम् ।।९।।

तदैकघस्रे शनगादिराख्ये ग्रामे ममाभून्मरणोपमानम् ।।
निदाघतापोत्थमतीव कृच्छ्रसाक्ष्येकवेद्यं वचसानिरूप्यम् ।।१०।।

जुष्टेऽप्यपूर्वौषधके न शान्तस्तापोऽधिकः प्रत्युत मेऽभवत् सः ।।
आवेदयन्मामथ रामदेवः स्वस्येति भावं गुरुराजहृद्गः ।।११।।

रात्र्या दिवा वा न परेण सौख्यमपि त्वधीशैर्ध्रुवमेव तेऽङ्ग ।।
अतः प्रयाणे निशि सौख्यमस्मिन् मासीति या धीः विपरीतधीः सा ।।१२।।

ततोऽभवन्मे लुठतः श्रमेण तापोपशान्तिश्च भृशं शमासीत् ।।
ततः समुत्थाय तदा गुरुभ्यो व्यथां सहाष्टाङ्गनतिं प्रहृष्यन् ।।१३।।

बुधास्तदा मां सहसा नमन्तं दृष्ट्वा किमासीदिति विस्मयेताः ।।
बभूवुरेनानवदं प्रहृष्टोऽनुसन्दधानो महिमानमीशाम् ।।१४।।

निदाघतापाभिहतः प्रतीकं मां दृष्टवन्तः खलु यूयमेव ।।
अपेततापः सहसाधुनाहमानन्दपूर्णोऽस्मृतमेव वच्मि ।।१५।।

ततोचरं श्रीमदधीशधाम्ने नमोऽद्भुतायाहमतीव हृष्टः ।।
तापोपशान्तीशमहामहिम्नो राद्यादिमत्ता च मयोच्यते ज्ञाः ।।१६।।

Rarest Archiver

ग्रीष्मो यतस्तापकरोति भीष्मः ततः प्रयाणं कृतवान् क्षपायाम् ।।
दिवा परित्यज्य तथापि मेऽभूच्छ्रमोऽधिकोऽनन्यनिवारणीयः ।।१७।।

मया प्रयाणं रचितं रजन्यां वरौषधादेरपि सेवनञ्च ।।
तथापि तापोऽधिक एव नित्यमद्यत्वसौ मे मरणोपमानः ।।१८।।

चिन्तारतस्येति बभूव धीर्मे नाथप्रसादान्नदिवा न रात्र्या ।।
परेण वा सौख्यमपि त्वधीशप्रयुक्तमेवात्र विचारणा न ।।१९।।

सत्येवमासीत् मम यामतिः सा भ्रान्तिः प्रयाणे रचिते रजन्याम् ।।
सौख्यं भवे तापकरेऽत्र मासे दिवा प्रयाणेन तु सौख्यमित्थम् ।।२०।।

मतिर्यदाभूदिति मे तदानीं तापोपशान्तिः समभूत् वपुश्च ।।
शीतं प्रहृष्टोऽस्मदधीशधाम्ने नमो व्यधां चित्रतमाय भक्त्या ।।२१।।

श्रुत्वेति वाणीं तुतुषुः स्म वेदव्यासार्यपूर्वाः मदुदीर्यमाणाम् ।।
बुधाः तदा धर्मपुरीनिवासाः कुतूहलाब्धाववगाहमानाः ।।२२।।

मयेर्यते यन्मदिनप्रयुक्तं सौख्यं समस्तं ध्रुवमित्यमुष्य ।।
नैवान्यथासिद्धिरितीरितुं तानहं पुनर्वाचमवोचमित्थम् ।।२३।।

सौख्यं समस्तं मदिनप्रयुक्तमितीर्यते यत्तदृतं तदा स्यात् ।।
दिवा प्रयाणेऽपि भवेन्न तापः सौख्यं यदि श्वोऽत्र पुनर्न शङ्का ।।२४।।

उक्त्वा बुधान् तान्निति गां प्रयाणं दिवा परस्मिन् दिवसद्वयेऽहम् ।।
व्यधां न तापः समभूदहो ज्ञास्तदाखिलानामपि सौख्यमेव ।।२५।।

कालेऽत्र गोत्रान्तरगऽध्वनिज्ञाः दिवा न तापोऽपि तु देहभाजाम् ।।
खरांशुसन्तप्तधरोरुतापो नूनं रजन्यामिति किं वदन्ती ।।२६।।

रात्रौ प्रयाणेऽपि पुनर्न तापः स्याच्चेत् सुखं तर्हि मयेरितं यत् ।।
असंशयं स्यादृतमित्युदीर्य रात्रौ प्रयाणं कृतवान् पुनश्च ।।२७।।

तथापि तपो न यदा ममासीदासीच्च सौख्यं न मदीशपादौ ।।
विनागतिः सत्यमिति ब्रुवंस्तानगामहं धर्मपुरीं सगोदाम् ।।२८।।

गोदावरीतीरसमुल्लसन्तीं नृसिंहभूदेवसुखप्रदात्रीम् ।।
समेत्य तां धर्मपुरीमहं ज्ञाः तत्रत्यविद्वज्जनमित्यवोचम् ।।२९।।

यायां यदा धर्मपुरीमधीशप्रसादतः सौख्यकरीमिमां ज्ञाः ।।
यायां सुखं श्रीनरसिहगोदावरीनदीवैष्णवराजसङ्घैः ।।३०।।

तत्र स्थितैर्निर्भरसौख्यबीजैर्मनोरथोऽभूदिति तेऽत्र मेऽद्य ।।
श्रीस्वामिराजोरुदयाप्रभावात् श्रीधर्मपुर्याप्तिरभूदविघ्नम् ।।३१।।

Rarest Archiver

इतः परं ज्ञा मम को विवादः सौख्येऽत्र पुर्यां नरसिंह एषः ।।
आस्ते निजाह्लादकरप्रशस्ता गोदावरी चावनिदेवसङ्घः ।।३२।।

इत्यब्रुवन् धर्मपुरीस्तधीरान् यदोदरे ज्ञा मम ताप आसीत् ।।
मृतिः प्रदः कावुरुतापतप्तगात्रोऽलुठं मीन इवोधृतः कात् ।।३३।।

उद्भूततापातिशयाभितप्तोऽलुठन् भृशं भूमितले तदा ज्ञाः ।।
पात्रस्थशीताम्भसितापशान्त्यै संस्थाप्य पादावुपविष्ट आसम् ।।३४।।

ततः परस्मिन् दिवसे प्रभाते गोदावरीक्षत्रिय एत्य दूतः ।।
स्वीयोऽम्बुना क्षालयति स्म वक्त्रं तदान्तिके कश्चन भूसुरोऽभूत् ।।३५।।

त्रिपुण्ड्रधृत् तुन्दिलरामनामा सत्राधिपत्यं हरदेवगेहे ।।
यस्तत्र भागानगराधिराजामात्याज्ञया धर्मपुरे चकार ।।३६।।

प्रक्षालयन्तं मुखमम्बुना तं दूतं तदानिन्ददलं स विप्रः ।।
स्वपार्श्वगं तुन्दिलरामसंज्ञः सन्ताडयन्ति स्म तदीयकाश्च ।।३७।।

पार्श्वे कुतस्त्वं महतोऽस्य वक्त्रप्रक्षालनं निर्मितवानरेऽसि ।।
तदीयका इत्यपराधमस्मिन् आरोप्य जघ्नु स्म तदा मठीयम् ।।३८।।

तदा तदाकर्ण्य मदीयदूताः तैस्ताड्यमानं त्वरया ययुस्तम् ।।
तान् क्षत्रियान् वीक्ष्य स रामनामा यातान् व्यजानादथ विग्रहाय ।।३९।।

सङ्क्रुद्धतद्रामनिदेशमाप्तैः सन्ताड्यमाना लगुडैस्तदीयैः ।।
ते क्षत्रियाः पुष्पितकिंशुका वा रक्तैः समाक्ता विबभुस्तदाहो ।।४०।।

क्रुद्धा अपि क्षत्रियमत्तनागास्तदा मदाज्ञाङ्कुशसन्निरुद्धाः ।।
तैस्ताड्यमाना अपि जोषमासन्नहो द्विजैस्तुन्दिलरामनिघ्नैः ।।४१।।

ते भस्मपुण्ड्रा मठपार्श्वमागुः सन्ताडयन्तः परुषोक्तिजालैः ।।
निदन्त आस्माकनिदेशसक्तान् विद्रावयन्तः स्म सहस्रशो नॄन् ।।४२।।

मठं समावव्रुरथात्र केचिदारुह्य शालां द्विजभुक्तिकृत्याम् ।।
केचित् तदा मर्कटका इवैतच्छालास्थवंशानुदमूलयं स्म ।।४३।।

तत्पर्णशालास्थतृणानि केचिदुदक्षिपंस्तुन्दिलरामतन्त्राः ।।
कोलाहलञ्चाशनकैश्चरन्तस्तत् पश्यतां चित्रमभूज्जनानाम् ।।४४।।

तदद्भुतं वीक्ष्य तदा मठीयाः पराद्रवन् केचन तत्र तत्र ।।
विलिल्लिरेऽस्मन्मठ एव केचित् भीताः किमायातं इति ब्रुवन्तः ।।४५।।

द्विजैर्यदा तुन्दिलरामनामा मत्पार्श्वमायाद्दशभिर्मठेऽहम् ।।
देवाग्रभागस्थितशालिकायां तदा स्थितः पुस्तकमीक्षमाणः ।।४६।।

अहो भवद्भिर्न विचार्यते नो द्विजा निजघ्नुर्भवदीयलोकाः ।।
निरङ्कुशा निर्गतविप्रहत्याभयाः किमेते पृथिवीसुरा नो ।।४७।।

क्रन्दन्त उच्चैरिति ते स्पृशन्मां गण्डद्वयं स्वाङ्गुलिकाग्रभागैः ।।
तदा चतुर्भिः कृतिभिः प्रविश्य व्यधां कपाटं सुरसद्म भीतः ।।४८।।

Rarest Archiver

किमेतदायातमिति ब्रुवाणः श्रीरामदेवप्रतिमादिपेटीः ।।
गुप्तामठीयैः सुरगेह एव स्थलान्तरे कारयमाशु हे ज्ञाः ।।४९।।

पञ्चाशदश्वाधिपती तुरुष्कौ मद्धानिकामद्विजरामनुन्नौ ।।
तथा गतौ तत्र समस्तनानापदार्थसङ्घैकतरस्तदागात् ।।५०।।

तथा द्वितीयो यवनप्रधानोऽभ्यायान्मठं देवगृहं तदाहम् ।।
बुधानवोचं गिरमापदीदृक् कथं ममोर्वीशदयस्य हेत्थम् ।।५१।।

ततः प्रतीतं कृतिनोऽब्रुवं तान् मन्तुर्मयाकारि मया प्रभूणाम् ।।
दशेदृशी मे तत एव नूनं मन्निर्मितागः श्रुणुत ब्रवीमि ।।५२।।

स्वामिप्रसादादगमं मुदाहं मोदावहां धर्मपुरीं मनोज्ञाम् ।।
सौख्ये विवादः क इतः परं म इतीरितं यत्प्रथमं बुधा वः ।।५३।।

मन्तुर्महान् नूनमयं पतीनां यत्सौख्यमात्रं तदधीशवश्यम् ।।
ईशान् विना मे न सुखं तटिन्यानया पुरा वा हरिणात्रगेन ।।५४।।

तस्मान्नृसिंहेन पुरानया वा नद्यानयान्यैरपि यत् सुखं तत् ।।
ईशप्रयुक्तं न हि संशयो मे सत्यं बुधाः सत्यमदोऽन्यथा न ।।५५।।

एवं स्थिते प्रोक्तमहोयदादावस्याः पुरः प्राप्तिरधीशतन्त्रा ।।
इतःपरन्तु स्वत एव सौख्यं अस्यां नृसिंहादिसुखप्रदात्र्याम् ।।५६।।

तदेतदस्मद्गुरुराजहृद्गः श्रीरामदेवोऽसहमान एताम् ।।
महापदं मे समजीजनत् ज्ञाः क्षाम्यत्वसौ मन्तुममुं दयालुः ।।५७।।

इति ब्रुवन्नङ्गुलिभिर्यदाहं सन्ताडयन् गण्डयुगं नमश्च ।।
व्यधां सहाष्टाङ्गमधीशधाम्ने नुतापवान् भक्तिभयातिनम्रः ।।५८।।

तदैवतापो मरणोपमानः श्रीस्वामिमाहात्म्यबलान्मदीयः ।।
अयात् क्षयं सँहननश्च शीतमतीव मेऽभूत् सुरगेहगस्य ।।५९।।

तथाखिले पश्यति वाजिराजात् पञ्चाशदश्वाधिपतिः पपात ।।
योऽभ्यागमन्नो मठमेषकोस्य द्वारे तदा चित्रमभूज्जनानाम् ।।६०।।

यतो ममोपक्रमकाल एव दुश्चिह्नमासीदपमानमेव ।।
क्षेमप्रदं नूनमिति ब्रुवाणः पदं निजं म्लेञ्छपतिर्ययौ सः ।।६१।।

बताविचार्यैव कृतो मयाद्य महात्मनां संयमिपुङ्गवानाम् ।।
मन्तुर्महानर्थकरोऽपकीर्तिकरश्च तस्मादधुनैव तेषाम् ।।६२।।

गत्वा सकाशं चरणौ प्रगृह्य प्रसादिताश्चेद्यतिपुङ्गवास्ते ।।
क्षेमोऽस्ति नूनं परथा न चेति तद्रामनाम्नश्च बभूव सद्धीः ।।६३।।

कोशालयैतं यवनप्रधानं निवार्य सद्धीरथरामनामा ।।
मठं प्रधानैर्दशभिः सहेत्य देवालयद्वारमितो ययाचे ।।६४।।

द्वारे कपाटापिहिते स्थितः सन् मामर्थयामास यदा स रामः ।।
तमब्रुवं भो त्वयि नो ध्रुवं यत् न प्रत्ययोऽन्तर्विवृतं प्रवेष्टुम् ।।६५।।

Rarest Archiver

न कारयेद्‌द्वारमतो यथेतं तथैव सद्म प्रतियाहि कामम् ।।
प्रतारको नाहमिति ब्रवीषि त्वमेव एवान्तरिहेहि नूनम् ।।६६।।

यदात्वमेवेहि विसृज्य सर्वानित्यब्रुवं तं स तदा तथेति ।।
प्रोच्य प्रयाप्य स्वजनान् बहिः सन्ननाम मत्यार्श्वमुपेत्य भक्त्या ।।६७।।

त्रिंशद्यदासौ कलधौतमुद्राः स्थूला निधाय प्रणमन् मदग्रे ।।
महापराधी ध्रुवमित्यवोचन्महानुतापान्मम विस्मयोऽभूत् ।।६८।।

य एव हन्तुं कृतवान् प्रयत्नं स एव मामेत्य नमन्निदानीम् ।।
महापराधीत्यसकृत् ब्रुवाणः क्षन्तव्यमित्यर्थयतेऽनुतापी ।।६९।।

को वात्र हेतुर्महिमानमीशां विनोत्तमानुस्मरणीयमज्ञः ।।
मृषामृषा वा निगदन्तु यत्प्रागितो मयोक्तं भवतः प्रति ज्ञाः ।।७०।।

प्रत्यक्षतो दृष्टमनन्यसाध्यं कार्यं यतस्तन्महिमानमीष्टे ।।
को वक्तुमीशामुरुधामधाम्नामित्यब्रुवं ज्ञानतिविस्मयेतः ।।७१।।

ततो ब्रुवन्तं न कृतं त्वयागः किं तु प्रभूणां रचितो मयैव ।।
मन्तुः फलं तस्य समन्वभूवं ब्रवीमि सत्यं रचितं त्वया किम् ।।७२।।

स्वामिप्रयुक्तं सकलं ममेष्टमनिष्टहानिश्च न संशयोऽत्र ।।
ते स्वामिनोऽलौकिकधामभाजस्तपस्विवर्याः सदृशाः न येषाम् ।।७३।।

एवं स्थिते प्रागवदं बुधान् श्रीस्वामिप्रसादात्सुखदात्र्यभून्मे ।।
श्रीधर्मपुर्यात् पिरितः परं तु को वा विवादो मम सौख्यलब्धौ ।।७४।।

अभीप्सितार्थैः सुखकार्यसौ पूः गोदावरीयश्च नृसिंहदेवः ।।
द्विजाः समस्ता इति यत्तदेतत्फलं ममाभूत् ध्रुवमद्य विप्र ।।७५।।

निमित्तमात्रं तु भवान् मयायं मन्तुः कृतस्तत्फलमन्वभावि ।।
तस्मान्नकोपस्त्वयि नाथधाम प्राकट्यमासीदिति तोष एव ।।७६।।

कुतो ममासीद्भयमेतदित्थमालोचिते भातमितं यदुक्तम् ।।
त्वां प्रत्यदोऽत्रत्य बुधानुदीर्याधीशापराधीति वचोब्रुवाणः ।।७७।।

कुर्वन्नहं गण्डचपेटिकां च व्यथां नमोऽधीशमहामहिम्ने ।।
तदा पुरा यः कुमतिस्त्वमेव मत्सान्त्वनायेह समागतोऽसि ।।७८।।

प्रीतिर्हरेः स्वामिषु चित्रचित्रा सीतापतेर्यत् स भृशं प्रसन्नः ।।
स्वामिप्रयुक्तं सकलं सुखं म इत्युक्तिमात्रात् सुखमित्ययच्छत् ।।७९।।

मदुक्तमित्यादि वचः स रामः श्रृण्वन्निमज्जन् कुतुकाम्बुराशौ ।।
तदा प्रभृत्यादरवान् सदा हो दासानुदासप्रतिमोऽभवत् ज्ञाः ।।८०।।

अन्यच्च चित्रं समभूद्दिने ज्ञास्तस्मिन् य आगादखिलार्थसद्म ।।
हेतोः कुतश्चित् सहतस्तुरुष्कः स्वजातिनान्येन निकृत्तमूर्धा ।।८१।।

Rarest Archiver

एवं माहात्म्यरत्नाब्धिस्वामिपूर्णप्रसादतः ।।
अन्वभूवमहं सौख्यं दूरीकृत्यापदोऽखिलाः ।।८२।।

सत्याभिपूर्वनवतीर्थपदास्यसारकासारजादिति सृतं शुभगोरसं ज्ञाः ।।
पीत्वातिशर्मरसिकाः नरसिंहपूर्वाः आयुर्मधुव्रतनिभाः भुविधन्यधन्याः ।।८३।।

मयार्पितां स्वक्षररत्नमालां रामो रमेशोऽभिनवां हृदि स्वे ।।
निधाय भूयान्मयि सुप्रसन्नः श्रीसत्यनाथेन्द्रहृदब्जहंसः ।।८४।।

सत्याभिनवतीर्थश्रीपादपादाब्जराजिताः ।।
पांसवः पावयन्त्वस्मान्नित्यं सर्वर्द्धिहेतवः ।।८५।।

आयुश्चकार सफलं गुरुराजसत्यनाथेन्द्रचारुचरितोत्तमकीर्तनेन ।।
सत्याभिपूर्वनवनामजगत्प्रपूज्यपादो य एष स गुरुः प्रतिजन्म मे स्यात् ।।८६।।

स्वचरण शरणं मां सत्यनाथेज्यपादा-
मलकरसलिलोत्थप्रोद्भवः सद्गुणाढ्यः ।।
गुरुचरणसरोजप्रेमरत्नाकरो यो
विचरतु स कृतार्थं भक्तकारुण्यसिन्धुः ।।८७।।

श्रीसत्यभिनवाख्यपूज्यचरणान्तेवासिना तन्मुदे
शेषाचार्यभुवादराद्विरचिते सङ्कर्षणाख्या युजा ।।
श्रीमत्सद्गुरुसत्यनाथयतिराण्माहात्म्यरत्नाकरे
सर्गो लाल्य इहोत्तमैः कविजनैरेकोनविंशोऽभवत् ।।८८।।

इति सत्यनाथमाहात्म्यरत्नाकरे एकोनविंशः सर्गः

।।श्रीकृष्णार्पणमस्तु।।

Rarest Archiver